.. 11. strIparva Kumbhaghonam Edition ..

॥ ११. स्त्रीपर्व ॥

स्त्रीपर्व - अध्याय ००१
॥ श्रीः ॥
११.१. अध्यायः १

Mahabharata - Strii Parva - Chapter Topics
सञ्जयेन पुत्रादीन्प्रति शोचतो धृतराष्ट्रस्य समाश्वासनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-१-० (६४७८०)
श्रीवेदव्यासाय नमः। ११-१-०क्ष् (५३०७)
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ११-१-१ (६४७८१)
जनमेजय उवाच। ११-१-१क्ष् (५३०८)
हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
धृतराष्ट्रो महाराज श्रुत्वा किमकरोन्मुने ॥ ११-१-१ (६४७८२)
तथैव कौरवो राजा धर्मपुत्रो महामनाः ।
कृपप्रभृतयश्चैव किमकुर्वत ते त्रयः ॥ ११-१-२ (६४७८३)
अश्वत्थाम्नः कृतं कर्म शापश्चान्योन्यकारितः ।
वृत्तान्मुत्रं ब्रूहि यदभाषत सञ्जयः ॥ ११-१-३ (६४७८४)
वैशम्पायन उवाच। ११-१-४क्ष् (५३०९)
हते पुत्रशते दीनं छिन्नशाखमिव द्रुमम् ।
पुत्रशोकाभिसन्प्तं धृतराष्ट्रं महीपतिम् ॥ ११-१-४ (६४७८५)
ध्यानमूकत्वमापन्नं चिन्तया समभिप्लुतम् ।
सञ्जयो जयतां श्रेष्ठ राजानं वाक्यमब्रवीत् ॥ ११-१-५ (६४७८६)
किं शोचसि महाराज नास्ति शोके सहायता ।
अक्षौहिण्यो हताश्चाष्टौ दश चैव विशाम्पते ।
निर्जितेयं वसुमती शून्या स्थास्यति केवलम् ॥ ११-१-६ (६४७८७)
नानादिग्भ्यः समागम्य नानाजात्या नराधिपाः ।
सहितास्व पुत्रेण सर्वे वै निधनं गताः ॥ ११-१-७ (६४७८८)

पितॄणां पुत्रपौत्राणां ज्ञातीनां सुहृदां तथा ।
गुरूणां चानुपूर्व्येण ये चान्येऽनुचरा हताः ।
प्रेतकार्याणि सर्वाणि कारयस्व नराधिप ॥ ११-१-८ (६४७८९)
वैशम्पायन उवाच। ११-१-९क्ष् (५३१०)
तच्छ्रुत्वा करुणं पुत्रपौत्रवधार्दितः ।
पपात भुवि दुर्धर्षो वाताहत इव द्रुमः ॥ ११-१-९ (६४७९०)
धृतराष्ट्र उवाच। ११-१-१०क्ष् (५३११)
हतपुत्रो हतामात्यो हतसर्वसुहृज्जनः ।
दुःखं नूनं गमिष्यामि विचरन्पृथिवीमिमाम् ॥ ११-१-१० (६४७९१)
किन्नु बन्धुविहीनस्य जीवितेन ममाद्य वै ।
लूनपक्षस्य इव मे वैनतेयस्य सञ्जय ॥ ११-१-११ (६४७९२)
हृतराज्यो हतसुहृद्धतपुत्रश्च वै तथा ।
न भ्राजिष्ये महाप्राज्ञ क्षीणरश्मिरिवांशुमान् ॥ ११-१-१२ (६४७९३)
न कृतं सुहृदां वाक्यं जामदग्न्यस्य च ॥
सभामध्ये तु कृष्णेन यच्छ्रेयोऽभिहितं मम। ११-१-१३ (६४७९४)
अलं वैरेण ते राजन्पुत्रः संगृह्यतामिति ।
तच्च वाक्यमकृत्वाऽहं भृशं तप्यामि दुर्मतिः ॥ ११-१-१४ (६४७९५)
न हि श्रोताऽस्मि भीष्मस्य शर्मयुक्तं प्रभाषितम् ॥ ११-१-१५ (६४७९६)
दुर्योधनस्य च तथा वृषभस्येव नर्दतः ।
दुःशासनवधं श्रुत्वा कर्णस्य च विपर्ययम् ।
द्रोणसूर्योपरागं च हृदयं मे विदीर्यते ॥ ११-१-१६ (६४७९७)
न स्मराम्यात्मनः किञ्चित्पुरा सञ्जय दुष्कृतम् ।
यस्येदं फलमद्येह मया मूढेन भुज्यते ॥ ११-१-१७ (६४७९८)
नूनं व्यपकृतं किञ्चिन्मया पूर्वेषु जन्मसु ।
येन मां दुःखभागेषु धाता कर्मसु युक्तवान् ॥ ११-१-१८ (६४७९९)
परिणामश्च वयसः सर्वबन्धुक्षयश्च मे ।
सुहृन्मित्रविनाशश्च दैवयोगादुपागतः ॥ ११-१-१९ (६४८००)
कोन्वस्ति दुःखिततरो मत्तोऽन्यो हि पुमान्भुवि ॥ ११-१-२० (६४८०१)
तन्मामद्यैव पश्यन्तु पाण्डवाः संशितव्रताः ।
विवृतं ब्रह्मलोकस्य दीर्घमध्वानमास्थितम् ॥ ११-१-२१ (६४८०२)
वैशम्पायन उवाच। ११-१-२२क्ष् (५३१२)
तस्य लालप्यमानस्य बहु शोकं विचिन्वतः ।
शोकापहं नरेन्द्रस्य सञ्जयो वाक्यमब्रवीत् ॥ ११-१-२२ (६४८०३)
शोकं राजन्व्यपनुद श्रुतास्ते वेदनिश्चयाः ।
शास्त्रागमाश्च विविधा वृद्धेभ्यो नृपसत्तम ॥ ११-१-२३ (६४८०४)
सृञ्जये पुत्रशोकार्ते यदूचुर्मुनयः पुरा ।

यथा यौवनजं दर्पमास्थिते ते सुते नृप ॥ ११-१-२४ (६४८०५)
न त्वया सुहृदां वाक्यं ब्रुवतामवधारितम् ।
स्वार्थश्च न कृतः कश्चिल्लुब्धेन फलगृद्धिना ॥ ११-१-२५ (६४८०६)
असिनैवैकधारेण स्वबुद्ध्या तु विचेष्टितम् ।
प्रायशोऽवृत्तसम्पन्नाः सततं पर्युपासिताः ॥ ११-१-२६ (६४८०७)
यस्य दुःशासनो मन्त्री राधेयश्च दुरात्मवान् ।
शकुनिश्चैव दुष्टात्मा चित्रसेनश्च दुर्मतिः ॥ ११-१-२७ (६४८०८)
अनल्पं येन वै सर्वं शल्यभूतं कृतं जगत् ।
कुरुवृद्धस्य भीष्मस्य गान्धार्या विदुरस्य च ॥ ११-१-२८ (६४८०९)
द्रोणस्य च महाराज कृपस्य च शरद्वतः ।
कृष्णस्य च महाबाहो नारदस्य च धीमतः ॥ ११-१-२९ (६४८१०)
ऋषीणां च तथाऽन्येषां व्यासस्यामिततेजसः ।
न कृतं तेन वचनं तव पुत्रेण भारत ।
क्षपिताः क्षत्रियाः सर्वे शत्रूणां वर्धितं यशः ॥ ११-१-३० (६४८११)
अधर्मसंयुतं किञ्चिन्नित्यं युद्धमिति ब्रुवन् ।
मध्यस्थो हि त्वमप्यासीर्न क्षमं किञ्चिदुक्तवान् ॥ ११-१-३१ (६४८१२)
धूर्धरेण त्वया भारस्तुलया न समं धृतः ॥ ११-१-३२ (६४८१३)
आदावेव मनुष्येण वर्तितव्यं यथाक्रमम् ।
यथा नातीतमर्थं वै पश्चात्तापेन युज्यते ॥ ११-१-३३ (६४८१४)
पुत्रगृद्ध्या त्वया राजन्प्रियं तस्य चिकीर्षितम् ।
पश्चात्तापमिमं प्राप्तो न त्वं शोचितुमर्हसि ॥ ११-१-३४ (६४८१५)
मधु यः केवलं दृष्ट्वा प्रपातं नानुपश्यति ।
स भ्रष्टोमधुलोभेन शोचत्येव यथा भवान् ॥ ११-१-३५ (६४८१६)
अर्थान्न शोचन्प्राप्नोति न शोचन्विन्दते सुखम् ।
न शोचञ्श्रियमाप्नोति न शोचन्विन्दते जयम् ॥ ११-१-३६ (६४८१७)
स्वयमुत्पादयित्वाऽग्निं परीतस्तेन योऽग्निना ।
दह्यमानः पुनस्तापं भजते न स पण्डितः ॥ ११-१-३७ (६४८१८)
त्वयैव ससुतेनायं वाक्यवायुसमीरितः ।
लोभाज्येन च संसिक्तो ज्वलितः पार्थपावकः ॥ ११-१-३८ (६४८१९)
तस्मिन्समिद्धे पतिताः शलभा इव ते सुताः ।
तान्केशवाग्निनिर्दग्धान्न त्वं शोचितुमर्हसि ॥ ११-१-३९ (६४८२०)
यच्चाश्रुपातकलिलं वदनं वहसे नृप ।
अशास्त्रदृष्टमेतद्धि न प्रशंसन्ति पण्डिताः ॥ ११-१-४० (६४८२१)
विस्फुलिङ्गा इव ह्येतान्दहन्ति किल मानवान् ।
जहीहि मन्युं बुद्ध्या वै धारयात्मानमात्मना ॥ ४१ ॥ ११-१-४१ (६४८२२)
वैशम्पायन उवाच। ११-१-४२क्ष् (५३१३)

एवमाश्वासितं तेन सञ्जयेन महात्मना ।
विदुरो भूय एवाह बुद्धिपूर्वं परन्तप ॥ ॥ ११-१-४२ (६४८२३)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-१-३ अश्वत्थाम्नः श्रुतं कर्म शापश्चान्योन्यकारित इति क पाठः । अश्वत्थान्नः श्रुतं कर्म शापादन्योन्यकरितादिति झ पाठः । तत्र अन्योन्यं कारितात्पाण्डवानां गर्भे ब्रह्मशिरोस्त्रं पतत्वित्यश्वत्थान्ना शापो दत्तः । सहस्रवर्षाणि गलत्कुष्ठो भविष्यसीत्यश्वत्थाम्नः कृष्णेन शापो दत्त इत्यर्थः ॥
११-१-६ शून्या राजभिर्हीना ॥
११-१-८ गुरूणां चानुपूर्व्येण प्रेतकार्याणि कारयेति झ पाठः । तत्र आनुपूर्व्येणेति । आदौ हतानामादावेव पश्चाद्धतानां पश्चादेवेति पौर्वापर्येण प्रेतानां परेतानां कार्याणि पारलौकिकानि कर्माणीत्यर्थः ॥
११-१-१५ श्रोतास्मि श्रुतवानस्मि ॥
११-१-१६ विपर्ययं विनाशम् ॥
११-१-२१ तन्मामिति । अद्यैव प्राणत्यागं करिष्यामीत्यर्थः ॥
११-१-२२ शोकं वितन्वत इति झ पाठः । तत्र वितन्वतः विरचयत इत्यर्थः ॥
११-१-२३ अवृत्तेति च्छेदः ॥
११-१-२८ शल्यश्च येन वै सर्वं इति झ पाठः । तत्र शल्यश्च मन्त्रीति पूर्वेणान्वयः ॥
११-१-३१ न धर्मः स कृतः कश्चिन्नित्यं युद्धमभीप्सता । अल्पबुद्धिरहकारी नित्यं युद्धमिति ब्रुवन् । क्रूरो दुर्मर्षणो नित्यमसन्तुष्टश्च वीर्यवान् । श्रुतवानसि मेधावी सत्यवांश्चैव नित्यदा । न मुह्यान्तीदृशाः सन्तो बुद्धिमन्तो भवादृशाः । न धर्मः सत्कृतः कश्चित्तव पुत्रेण मारिष । इति झ पाठः । अत्र ब्रुवन् दुर्योधनं आसीदिति शेषः ॥
११-१-३२ दुर्धरेणेति झ ट पाठः ॥
११-१-३५ प्रपातं पर्वताग्राद्भ्रंशम् ॥
११-१-४१ जहि मन्युं स्वबुद्ध्या वै इति क छ ट पाठः । दहन्ति शोका इत्यर्थात् । मन्युं दैन्यम् । मन्युर्दैन्ये क्रतौ क्रुधि इत्यमरः । आत्मानं चित्तं आत्मना धैर्येण धारय । प्राणान्मात्याक्षीरित्यर्थः ॥
११-१-१ प्रथमोऽध्यायः ॥

स्त्रीपर्व - अध्याय ००२
॥ श्रीः ॥
११.२. अध्यायः २

Mahabharata - Strii Parva - Chapter Topics
विदुरेण शास्त्रार्थकथनेन धृतराष्ट्रस्य शोकापनोदनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-२-० (६४८२४)
वैशम्पायन उवाच। ११-२-०क्ष् (५३१४)
ततोऽमृतरसैर्वाक्यैर्ह्लादयन्पुरुषर्षभम् ।
वैचित्रवीर्यं विदुरो यदुवाच निबोध तत् ॥ ११-२-१ (६४८२५)
विदुर उवाच। ११-२-२क्ष् (५३१५)
उत्तिष्ठ राजन्किं शेषे धारयात्मानमात्मना ।
एषा वै सर्वसत्वानां लोकेश्वर परा गतिः ॥ ११-२-२ (६४८२६)
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ ११-२-३ (६४८२७)
यदा शूरं च भीरुं च यमः कर्षति भारत ।
तत्किं न योत्स्यन्ति हि ते क्षत्रियाः क्षत्रियर्षभ ॥ ११-२-४ (६४८२८)
अयुध्यमानो म्रियते युध्यमानश्च जीवति ।
कालं प्राप्य महाराज न कश्चिदतिवर्तते ॥ ११-२-५ (६४८२९)
अभावादीनि भूतानि भावमध्यानि भारत ।
अभावनिधनान्येव तत्र का परिदेवना ॥ ११-२-६ (६४८३०)
न शोचन्मृतमन्वेति न शोचन्म्रियते नरः ।
एवं सांसिद्धिके लोके किमर्थमनुशोचसि ॥ ११-२-७ (६४८३१)
कालः कर्षति भूतानि सर्वाणि विविधान्युत ।
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ॥ ११-२-८ (६४८३२)
यथा वायुस्तृणाग्राणि संवर्तयति सर्वशः ।
तथा कालवशं यान्ति भूतानि भरतर्षभ ॥ ११-२-९ (६४८३३)
एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्य कालः स यात्यग्रे तत्र का परिदेवना ॥ ११-२-१० (६४८३४)
न चाप्येतान्हतान्युद्धे राजञ्शोचितुमर्हसि ।
प्रमाणं यदि शास्त्राणि गतास्ते परमां गतिम् ॥ ११-२-११ (६४८३५)
सर्वे स्वाध्यायवन्तो हि सर्वे च चरितव्रताः ।

सर्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना ॥ ११-२-१२ (६४८३६)
अदर्शनादापतिताः पुनश्चादर्शनं गताः ।
नैते तव न तेषां त्वं तत्र का परिदेवना ॥ ११-२-१३ (६४८३७)
हतो हि लभते स्वर्गं जित्वा च लभते यशः ।
उभयं नो बहुगुणं नास्ति निष्फलता रणे ॥ ११-२-१४ (६४८३८)
तेषां कामदुघाँल्लोकानिन्द्रः सङ्कल्पयिष्यति ।
इन्द्रस्यातिथयो ह्येते भवन्ति भरतर्षभ ॥ ११-२-१५ (६४८३९)
न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया ।
स्वर्गं यान्ति तथा मर्त्या यथा शूरा रणे हताः ॥ ११-२-१६ (६४८४०)
शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः ।
हूयमानाञ्शरांश्चैव सेहुस्तेजस्विनो मिथः ॥ ११-२-१७ (६४८४१)
एवं राजंस्तवाचक्षे स्वर्ग्यं पन्थानमुत्तमम् ।
न युद्धादधिकं किञ्चित्क्षत्रियस्येह विद्यते ॥ ११-२-१८ (६४८४२)
क्षत्रियास्ते महात्मानः शूराः समितिशोभनाः ।
आशिषः परमाः प्राप्ता न शोच्याः सर्व एव हि ॥ ११-२-१९ (६४८४३)
आत्मानमात्मनाऽऽश्वास्य मा शुचः पुरुषर्षभ ।
नाद्य शोकाभिभूतस्त्वं कायमुत्स्रष्टुमर्हसि ॥ ११-२-२० (६४८४४)
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि कस्य ते कस्य वा वयम् ॥ ११-२-२१ (६४८४५)
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसेदिवसे मूढमाविशन्ति न पण्डितम् ॥ ११-२-२२ (६४८४६)
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ।
न मध्यस्थः क्वचित्कालः सर्वं कालः प्रकर्षति ॥ ११-२-२३ (६४८४७)
कालः पचति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ ११-२-२४ (६४८४८)
अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः ।
आरोग्यं प्रियसंवासो गृद्ध्येदेषु न पण्डितः ॥ ११-२-२५ (६४८४९)
न जानपदिकं दुःखमेकः शोचितुमर्हसि ।
अप्यभावेन युज्येत तच्चास्य न निवर्तते ॥ ११-२-२६ (६४८५०)
अशोचन्प्रतिकुर्वीत यदि पश्येत्पराक्रमम् ।
भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत् ॥ ११-२-२७ (६४८५१)
चिन्त्यमानं हि न व्येति भूयश्चापि प्रवर्धते ॥
अनिष्टसम्प्रयोगाच्च विप्रयोगात्प्रियस्य च। ११-२-२८ (६४८५२)
मानुषा मानसैर्दुःखैर्युज्यन्ते येऽल्पबुद्धयः ॥
नार्थो न धर्मो न सुखं यदेतदनुशोचति। ११-२-२९ (६४८५३)
तच्च नाप्नोति कार्यार्थं त्रिवर्गाच्चैव भ्रश्यते ॥

अन्योन्यबाधनावस्थां प्राप्य वैषयिकीं नराः। ११-२-३० (६४८५४)
असन्तुष्टाः प्रमुह्यन्ति सन्तोषं यान्ति पण्डिताः ॥
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः। ११-२-३१ (६४८५५)
एतद्विज्ञानसामर्थ्यं न बालैः समतामियात् ॥
शयानं चानुशेते हि तिष्ठन्तं चानुतिष्ठति। ११-२-३२ (६४८५६)
अनुधावति धावन्तं कर्म पूर्वकृतं नरम् ॥
यस्यांयस्यामवस्थायां यत्करोति शुभाशुभम्। ११-२-३३ (६४८५७)
तस्यांतस्यामवस्थायां तत्तत्फलमवाप्नुते ॥
श्येनयेन शरीरेण यद्यत्कर्म करोति यः। ११-२-३४ (६४८५८)
तेनतेन शरीरेण तत्फलं समुपाश्नुते ॥
आत्मैव ह्यात्मनः साक्षी कृतस्यापकृतस्य च ॥११-२-३५ (६४८५९)
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं भवति सर्वत्र नाकृतं विद्यते क्वचित् ॥११-२-३६ (६४८६०)
न हि ज्ञानविरुद्धेषु बह्वपायेषु कर्मसु ।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ ॥ ११-२-३७ (६४८६१)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-२-२ एषा मरणान्ता । अत उत्तिष्ठ शोकं त्यज ॥
११-२-६ अभावादीनि दुःखानि दुःखमध्यानि भारतेति छ पाठः ॥
११-२-८ सांसिद्धिके स्वभावसिद्धे ॥
११-२-९ संवर्तयति स्ववशं नयति ॥
११-२-१० तत्र गामिनां परत्र गमनशीलानां यस्य काल उपस्थितः
सोऽग्रे प्रयाति ॥
११-२-१३ अदर्शनादज्ञानात् ॥
११-२-१४ नोऽस्माकं क्षत्रियाणाम् ॥
११-२-१८ आचक्षे कथयामि ॥
११-२-२६ अतपदिकं सर्वसाधारणम् । अभावेन मरणेन। तच्च दुःखं च ॥
११-२-३० नच नापैति कार्यार्थात्त्रिवर्गाच्चैव हीयते इति झ पाठः
। तत्र कार्यार्थान्नापैतीतिनापित्वपैत्येवेत्यर्थः ॥
११-२-३१ अन्यामन्यां पनावस्थां प्राप्य वैशेषिकीं नराः । इति झ पाठः ॥
११-२-३४ अवस्थायां यौवनादिरूपायाम् ॥
११-२-३५ येनेति । स्थूलेन देहेन कृते तत्तेनैव
भुज्यते। मनःकृत्तं चेत्तेनैव भुज्यते स्वप्नादौ ॥
११-२-२ द्वितीयोऽध्यायः ॥

स्त्रीपर्व - अध्याय ००३
॥ श्रीः ॥
११.३. अध्यायः ३

Mahabharata - Strii Parva - Chapter Topics
विदुरेण धृतराष्ट्रकापनोदनाय शास्त्रार्थकथनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-३-० (६४८६२)
वृतराष्ट्र उवाच। ११-३-०क्ष् (५३१६)
सुमाषितं महाप्राज्ञ शोकोऽयं विगतो मम ।
भूय एव तु वाक्यानि श्रोतुमिच्छामि तत्त्वतः ॥ ११-३-१ (६४८६३)
अनिष्टानां च संसर्गादिष्टानां च निवर्तनात् ।
कथं हि मानसं दुःखं विप्रयुज्यन्ति पण्डिताः ॥ ११-३-२ (६४८६४)
विदुर उवाच। ११-३-३क्ष् (५३१७)
वतोयतो मनो दुःखात्सुखाद्र विप्रमुच्यते ।
तवत्तसः शगं लब्ध्वा सुगतिं विन्दते बुधः ॥ ११-३-३ (६४८६५)
अशाधतमिदं सर्वं चिन्त्यमानं नरर्षभ ।
कदलीसन्निभो लोकः सारो ह्यस्य न विद्यते ॥ ११-३-४ (६४८६६)
श्यदा प्राज्ञाश्च मूढाश्च धनवन्तोऽथ निर्धनाः ।
सर्वे पितृवनं प्राप्य स्वपन्ति विगतज्वराः ॥ ११-३-५ (६४८६७)
निर्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धिभिः ।
किं विशेषं प्रपश्यन्ति तत्र तेषां परे जनाः ॥ ११-३-६ (६४८६८)
येन प्रत्यवगच्छेयुः कुलरूपविशेषणम् ।
कस्मादन्योन्यमिच्छन्ति विप्रलब्धधियो नराः ॥ ११-३-७ (६४८६९)
गृहाण्येव हि मर्त्यानामाहुर्देहानि पण्डिताः ।
कालेन विनियुज्यन्ते सत्वमेकं तु शोभनम् ॥ ११-३-८ (६४८७०)
यथा जीर्णमजीर्णं वा वस्त्रं त्यक्त्वा तु पूरुषः ।
अन्यद्रोचयते वस्त्रमेवं देहाः शरीरिणाम् ॥ ११-३-९ (६४८७१)
वैचित्रवीर्य सत्यं हि दुःखं वा यदि वा सुखम् ।
प्राप्नुवन्तीह भूतानि स्वकृतेनैव कर्मणा ॥ ११-३-१० (६४८७२)
कर्मणा प्राप्यते स्वर्गः सुखं दुःखं च भारत ।
ततो वहति तं भारमवशः स्ववशोऽपि वा ॥ ११-३-११ (६४८७३)
यथा च मृन्मयं भाण्डं चक्रारूढं विपद्यते ।

किञ्चित्प्रक्रियमाणं वा कृतमात्रमथापि वा ॥ ११-३-१२ (६४८७४)
हीनं वाऽप्यवरोप्यं वा अवतीर्णमथापि वा ।
आर्द्रं वाऽप्यथवा शुष्कं पच्यमानमथापि वा ॥ ११-३-१३ (६४८७५)
अवतार्यन्तमापाङ्कादुद्धृतं चापि भारत ।
अथवा परिभुज्जन्तमेवं देहाः शरीरिणाम् ॥ ११-३-१४ (६४८७६)
गर्भस्थो वा प्रसूतो वाऽप्यथवा दशरात्रिकः ।
अर्धमासगतो वाऽपि मासमात्रगतोऽपि वा ॥ ११-३-१५ (६४८७७)
संवत्सरगतो वापि द्विसंवत्सर एव वा ।
यौवनस्थोऽथ मध्यस्थो वृद्धो वापि विपद्यते ॥ ११-३-१६ (६४८७८)
प्राक्कर्मभिस्तु भूतानि भवन्ति नभवन्ति च ।
एवं संबर्धिते लोके किमर्थमनुतप्यसे ॥ ११-३-१७ (६४८७९)
यथा तु सलिलं राजन्क्रीडार्थमनुसञ्चरन् ।
उन्मज्जेच्च निमज्जेच्च चेष्टते च नराधिप ॥ ११-३-१८ (६४८८०)
एवं संसारगहने उन्मज्जननिमज्जने ।
कर्मयोगेन बध्यन्ते क्लिश्यन्ते चाल्पबुद्धयः ॥ ११-३-१९ (६४८८१)
ये तु प्राज्ञाः स्थिता मध्ये संसारान्तगतैषिणः ।
समागमज्ञा भूतानां ते यान्ति परमां गतिम् ॥ ॥ ११-३-२० (६४८८२)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि तृतीयोऽध्यायः
॥ ३ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-३-१ सुभाषितैरिति झ पाठः ॥
११-३-५ पितृवनं मृत्युम् ॥
११-३-८ सत्वमेकं तु शास्वतमिति झ पाठः । तत्र सत्वं
लिङ्गशरीरम्। शाश्वतं मोक्षपर्यन्तं स्थायित्वात् इत्यर्थः ॥
११-३-१३ अवरोप्यन्तमितिपाठे अवरोप्यमाणम् ॥
११-३-१४ आपाकात् कुलालकृतात् पात्रपाककूटात् । अथवा परिभृज्जन्तमिति
झ पाठः ॥
११-३-१९ एवं संसारगहनादुन्मज्जननिमज्जनात् इति क छ ट पाठः ॥
११-३-३ तृतीयोऽध्यायः ॥

स्त्रीपर्व - अध्याय ००४
॥ श्रीः ॥
११.४. अध्यायः ४

Mahabharata - Strii Parva - Chapter Topics
विदुरेण धृतराष्ट्रंप्रति जीवस्य गर्भवासप्रकारकथनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-४-० (६४८८३)
धृतराष्ट्र उवाच। ११-४-०क्ष् (५३१८)
कथं संसारगहनं विज्ञेयं वदतां वर ।
एतदिच्छाम्यहं श्रोतुं तत्त्वमाख्याहि पृच्छतः ॥ ११-४-१ (६४८८४)
विदुर उवाच। ११-४-२क्ष् (५३१९)
जन्मप्रभृति भूतानां क्रियाः सर्वास्तु लक्षयन् ।
पूर्वमेवेह कलिले वसते किञ्चिदन्तरम् ॥ ११-४-२ (६४८८५)
ततः स पञ्चमेऽतीते मासे मांसमकल्पयत् ।
ततः सर्वाङ्गसम्पूर्णो गर्भो मासे तु जायते ॥ ११-४-३ (६४८८६)
अमेध्यमध्ये वसति मांसशोणितलेपने ।
ततस्तु वायुवेगेन ऊर्ध्वपादो ह्यधोमुखः ॥ ११-४-४ (६४८८७)
योनिद्वारमुपागम्य बहून्क्लेशान्समृच्छति ।
योनिसंपीडनाच्चैव पूर्वकर्मभिरन्वितः ॥ ११-४-५ (६४८८८)
तस्मान्मुक्तः स संसारादन्यान्पश्यत्युपद्रवान् ।
ग्रहास्तमनुच्छन्ति सारमेया इवामिषम् ॥ ११-४-६ (६४८८९)
ततः कालान्तरे प्राप्ते व्याधयश्चापि तं तथा ।
उपसर्पन्ति जीवन्तं बध्यमानं स्वकर्मभिः ॥ ११-४-७ (६४८९०)
बद्धमिन्द्रियपाशैस्तं सङ्गकामुकमातुरम् ।
व्यसनान्यनुवर्तन्ते विविधानि नराधिप ॥ ११-४-८ (६४८९१)
बाध्यमानश्च तैर्भूयो नैव तृप्तिमुपैति सः ।
श्तदा नावैति चैवायं प्रकुर्वन्साध्वसाधु वा ।॥ ११-४-९ (६४८९२)
तत्रैनं परिपश्यन्ति ये ध्यानपरिनिष्ठिताः ।
अयं न बुध्यते तावद्यमलोकादिहागमे ॥ ११-४-१० (६४८९३)
यमदूतैर्विकृष्यंश्च मृत्युं कालेन गच्छति ।
वाग्घीनस्य च या मात्रा इष्टानिष्टकृताऽस्य वै ।
भूय एवात्मनाऽऽत्मानं बध्यमानमुपैति सः ॥ ११-४-११ (६४८९४)
अहो विनिकृतो लोको लोभेन च वशीकृतः ।
लोभक्रोधमदोन्मत्तो नात्मानमवबुध्यते ॥ ११-४-१२ (६४८९५)
कुलीनत्वे च रमते दुष्कुलीनान्विकुत्सयन् ।
धनदर्पेण दृप्तश्च दरिद्रान्परिकुत्सयन् ॥ ११-४-१३ (६४८९६)
मूर्खानिति परानाह नात्मानं समवेक्षते ।

दोषान्क्षिपति चान्येषां नात्मानं शास्तुमिच्छति ॥ ११-४-१४ (६४८९७)
यदा प्राज्ञाश्च मूर्खाश्च धनवन्तश्च निर्धनाः ।
कुलीनाश्चाकुलीनाश्च मानिनोऽथाप्यमानिनः ॥ ११-४-१५ (६४८९८)
सर्वे पितृवनं प्राप्ताः स्वपन्ति विगतत्वचः ।
निर्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः ॥ ११-४-१६ (६४८९९)
किं विशेषं प्रपश्यन्ति तत्र तेषां परे जनाः ।
येन प्रत्यवगच्छेयुः कुलरूपविशेषणम् ॥ ११-४-१७ (६४९००)
यदा सर्वे समं न्यस्ताः स्वपन्ति धरणीतले ।
कस्मादन्योन्यमिच्छन्ति विप्रलब्धुमिहाबुधाः ॥ ११-४-१८ (६४९०१)
प्रत्यक्षं च परोक्षं च यो निशम्य श्रुतिं त्विमाम् ।
श्अध्रुवे जीवलोकेऽस्मिन्यो धर्ममनुपालयन् ॥
जन्मप्रभृति वर्तेत प्राप्नुयात्परमां गतिम् ॥ ११-४-१९ (६४९०२)
एवं सर्वं विदित्वा वै यस्तत्त्वमनुवर्तते ।
स प्रमोक्षयते चैव पन्थानं मनुजेश्वर ॥ ॥ ११-४-२० (६४९०३)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि चतुर्थोऽध्यायः
॥ ४ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-४-२ कलिलं शुकशोणितसंयोगः । एकरात्रोषितं कलिलं भवति
पञ्चरात्राद्बुद्बुद इत्यादिशास्त्राद्गम्यते। तत्र कलिले वसते जीव
इति शेषः। किञ्चिदन्तरं पूर्वदिनापेक्षया वृद्ध्यवस्थाभेदेन
अल्पेन परिमाणान्तरेण ॥
११-४-५ पूर्वकर्मापदानत इति क पाठः ॥
११-४-६ मृगयन्पर्यटन्नित्यं सारमेया इति ट पाठः ॥
११-४-४ चतुर्थोऽध्यायः ॥

स्त्रीपर्व - अध्याय ००५
॥ श्रीः ॥
११.५. अध्यायः ५

Mahabharata - Strii Parva - Chapter Topics

विदुरेण धृतराष्ट्रं प्रति उत्तराध्याये वक्ष्यमाणसंसारादीनां
कान्तारादित्वेन रूपणम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-५-० (६४९०४)
धृतराष्ट्र उवाच। ११-५-०क्ष् (५३२०)
यदिदं धर्मगहनं बुद्ध्या समनुबुध्यते ।
एतद्विस्तरतः सर्वं बुद्धिमार्गं प्रशंस मे ॥ ११-५-१ (६४९०५)
विदुर उवाच। ११-५-२क्ष् (५३२१)
अत्र ते सर्वयिष्यामि नमस्कृत्वा स्वयम्भुवे ।
यथा संसारगहनं वदन्ति परमर्षयः ॥ ११-५-२ (६४९०६)
कश्चिन्महति कान्तारे वर्तमानो द्विजः किल ॥
महद्दुर्गमनुप्राप्तो वनं क्रव्यादसङ्कुलम् ॥ ११-५-३ (६४९०७)
सिंहव्याघ्रगजर्क्षौघैरतिघोरमहास्वनैः ।
पिशितादैरतिभयैर्महोग्राकृतिभिस्तथा ॥ ११-५-४ (६४९०८)
समन्तात्सम्परिक्षिप्तं यस्माद्द्रष्टुर्महद्भयम् ।
तदस्य दृष्ट्वा हृदयमुद्वेगमगमत्परम् ॥ ११-५-५ (६४९०९)
अभ्युच्छ्रयन्ति रमाणि विक्रियाश्च परन्तप ।
स तद्वनं व्यनुसरन्सम्प्रधावन्नितस्ततः ॥ ११-५-६ (६४९१०)
वीक्षमाणो दिशः सर्वाः शरणं क्व भवेदिति ।
स तेषां नाशमन्विच्छन्प्रद्रुतो भयपीडितः ।
न च निर्याति वै दूरं न वा तैर्विप्रयुज्यते ॥ ११-५-७ (६४९११)
अथापश्यद्वनं गूढं समन्ताद्वागुरावृतम् ।
बाहुभ्यां सम्परिष्वक्तः स्त्रिया परमघोरया ॥ ११-५-८ (६४९१२)
पञ्चशीर्षधरैर्नागैः शैलैरिव समुन्नतैः ।
नभःस्पृशैर्महावृक्षैः परिक्षिप्तं महावनम् ॥ ११-५-९ (६४९१३)
वनमध्ये च तत्राभूदुदपानः समावृतः ।
वल्लीभिस्तृणनद्धाभिर्गूढाभिरभिसंवृतः ॥ ११-५-१० (६४९१४)
पपात स द्विजस्तत्र निगूढे सलिलाशये ।
विलग्नश्चाभवत्तस्मिँल्लतासन्तानसङ्कुले ॥ ११-५-११ (६४९१५)
पनसस्य यथा जातं वृन्तबद्धं महाफलम् ।
स तथा लम्बते तत्र ह्यूर्ध्वपादो ह्यधः शिराः ॥ ११-५-१२ (६४९१६)
अथ तत्रापि चान्योऽस्य भूयो जात उपद्रवः ।
कूपमध्ये महानागमपश्यत महाबलम् ॥ ११-५-१३ (६४९१७)
कूपवीनाहवेलायामपश्यत् महागजम् ॥ ११-५-१४ (६४९१८)
षड्वक्त्रं कृष्णशबलं द्विषट्कपदचारिणम् ।
क्रमेण परिसर्पन्तं वल्लीवृक्षसमावृतम् ॥ ११-५-१५ (६४९१९)
तस्य शाखाप्रशाखासु वृक्षशाखावलम्बिनः ।
नानारूपा मधुकरा घोररूपा भयावहाः ॥ ११-५-१६ (६४९२०)

आसते मधु संवृत्य पूर्वमेव निकेतजाः ।
भूयोभूयः समीहन्ते मधूनि भरतर्षभ ॥ ११-५-१७ (६४९२१)
स्वादनीयानि भूतानां यैर्बालो न वितृप्यते ।
तेषां मधूनां बहुधा धारा प्रस्रवते तदा ॥ ११-५-१८ (६४९२२)
आलम्बमानः स पुमान्धारां पिबति सर्वदा ।
न चास्य तृष्णा विरता पिबमानस्य सङ्कटे ॥ ११-५-१९ (६४९२३)
अभीप्सति च तां नित्यमतृप्तः स पुनः पुनः ।
न चास्य जीविते राजन्निर्वेदः समजायत ॥ ११-५-२० (६४९२४)
तत्रैव च मनुष्यस्य जीविताशा प्रतिष्ठिता ।
कृष्णाः श्वेताश्च तं वृक्षं निकृन्तन्ति स्म मूषिकाः ॥ ११-५-२१ (६४९२५)
व्यालैश्च तद्वनं दुर्गं स्त्रिया च परमोग्रया ।
कूपाधस्ताच्च नागेन पीनाहे कुञ्जरेण च ॥ ११-५-२२ (६४९२६)
वृक्षप्रपाताच्च भयं मूषिकेभ्यश्च पञ्चमम् ।
मधुलोभान्मधुकरैः षष्ठमाहुर्महद्भयम् ॥ ११-५-२३ (६४९२७)
एवं स वसते तत्र क्षिप्तः संसारसागरे ।
न चैव जीविताशायां निर्वेदमुपगच्छति ॥ ॥ ११-५-२४ (६४९२८)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

स्त्रीपर्व - अध्याय ००६
॥ श्रीः ॥
११.६. अध्यायः ६

Mahabharata - Strii Parva - Chapter Topics
पूर्वाध्याये कान्तारादित्वेन रूपितानां संसारादीनां स्वस्वशब्दैः प्रतिपादनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-६-० (६४९२९)
धृतराष्ट्र उवाच। ११-६-०x (५३२२)
अहो खलु महद्दुःखं कृच्छ्रवासं वसत्यसौ ।
कथं तस्य रतिस्तत्र तुष्टिर्वा वदतां वर ॥ ११-६-१ (६४९३०)
स देशः क्वनु यत्रासौ वसते धर्मसङ्कटे ।

कथं वा स विमुच्येत नरस्तस्मान्महाभयात् ॥११-६-२ (६४९३१)
एतन्मे सर्वमाचक्ष्व साधु चेष्टामहे तदा ।
कृपा मे महती जाता तस्याभ्युद्धरणेन हि ॥११-६-३ (६४९३२)
विदुर उवाच।११-६-४क्ष् (५३२३)
उपाख्यानमिदं राजन्मोक्षविद्भिरुदाहृतम् ।
सुगतिं विन्दते येन परलोकेषु मानवः ॥११-६-४ (६४९३३)
उच्यते यत्तु कान्तारं महासंसार एव सः ।
वनं दुर्गं हि यच्चैतत्संसारगहनं हि तत् ॥११-६-५ (६४९३४)
ये च ते कथिता व्याला व्याधयस्ते प्रकीर्तिताः ॥ ११-६-६ (६४९३५)
या सा नारी बृहत्काया अध्यतिष्ठत तत्र वै ।
तामाहुस्तु जरां प्राज्ञा रूपवर्णविनाशिनीम् ॥११-६-७ (६४९३६)
स यस्तु कूपो नृपते स तु देहः शरीरिणाम् ।
यस्तत्र वसतेऽधस्तान्महाहिः काल एव सः ।
अन्तकः सर्वभूतानां देहिनां प्राणहार्यसौ ॥ ११-६-८ (६४९३७)
कूपमध्ये च या जाता वल्ली यत्र स मानवः ।
प्रोतो यथाऽभवल्लग्नो जीविताशा शरीरिणाम् ॥११-६-९ (६४९३८)
स यस्तु कूपपीनाहे तं वृक्षं परिसर्पति ।
षड्वक्त्रः कुञ्जरो राजन्स तु संवत्सरः स्मृतः ॥११-६-१० (६४९३९)
मुखानि ऋतवो मासाः पादा द्वादशा कीर्तिताः ।
ये तु वृक्षं निकृन्तन्ति मूषिकाः पन्नगास्तथा ॥११-६-११ (६४९४०)
रात्र्यहानि तु तान्याहुर्भूतानां परिचिन्तकाः ।
ये ते मधुकरास्तत्र कामास्ते परिकीर्तिताः ॥११-६-१२ (६४९४१)
यास्तु ता बहुशो धाराः स्रवन्ति मधुनिस्रवम् ।
तांस्तु कामरसान्विन्द्याद्यत्र सज्जन्ति मानवाः ॥११-६-१३ (६४९४२)
एवं संसारचक्रस्य परिवृत्तिं विदुर्बुधाः ।
येन संसारचक्रस्य पाशांश्छिन्दन्ति सर्वथा ॥ ॥११-६-१४ (६४९४३)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि पञ्चमोऽध्यायः ॥५ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-६-४ उपमानमिदं राजन्निति झ पाठः ॥
११-६-६ षष्ठोऽध्यायः ॥

स्त्रीपर्व - अध्याय ००७
॥ श्रीः ॥

११.७. अध्यायः ७

Mahabharata - Strii Parva - Chapter Topics

विदुरेण धृतराष्ट्रम्प्रति तत्त्वकथनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-७-० (६४९४४)
धृतराष्ट्र उवाच। ११-७-०क्ष् (५३२४)
अहोऽभिहितमाख्यान भवता तत्त्वदर्शिना ।
भूय एव तु मे हर्षः श्रोतुं वागमृतं तव ॥ ११-७-१ (६४९४५)
विदुर उवाच। ११-७-२क्ष् (५३२५)
शृणु भूयः प्रवक्ष्यामि मार्गस्यैतस्य विस्तरम् ।
यच्छ्रुत्वा विप्रमुच्यन्ते संसाराद्धि विचक्षणाः ॥ ११-७-२ (६४९४६)
यथा तु पुरुषो राजन्दीर्घमध्वानमास्थितः ।
क्वचित्क्वचिच्छ्रमस्थानं कुरुते वासमेव वा ॥ ११-७-३ (६४९४७)
एवं संसारपर्याये गर्भवासेषु भारत ।
कुर्वन्ति दुर्बुधा वासं मुच्यन्ते तत्र पण्डिताः ॥ ११-७-४ (६४९४८)
तस्मादध्वानमेवैतमाहुः शास्त्रविदो जनाः ।
यत्तत्संसारगहनं वनमाहुर्मनीषिणः ॥ ११-७-५ (६४९४९)
सोयं लोकसमावर्तो मर्त्यानां भरतर्षभ ।
चराणां स्थावराणां च न गृध्येत्तत्र पाण्डितः ॥ ११-७-६ (६४९५०)
शारीरा मानसाश्चैव मर्त्यानां व्याधयश्च ये ।
प्रत्यक्षाश्च परोक्षाश्च ते व्यालाः कथिता बुधैः ॥ ११-७-७ (६४९५१)
क्लिश्यमानाश्च तैर्नित्यं मार्यमाणाश्च भारत ।
स्वकर्मभिर्महाव्यालैर्नोद्विजन्त्यल्पबुद्धयः ॥ ११-७-८ (६४९५२)
अथापि तैर्विमुच्येत व्याधिभिः पुरुषो नृप ।
आवृणोत्येव तं पश्चाज्जरा रूपविनाशिनी ॥ ११-७-९ (६४९५३)
शब्दरूपरसस्पर्शगन्धैश्च विविधैरपि ।
मज्जमानं महापङ्के निरालम्बे समन्ततः ॥ ११-७-१० (६४९५४)
संवत्सरर्तवो मासाः पक्षाहोरात्रसन्धयः ।
क्रमेणास्य प्रवृज्जन्ति रूपमायुस्तथैव च ॥ ११-७-११ (६४९५५)
एते कालस्य विधयो नैताञ्जानान्ति दुर्बुधाः ।
धात्राऽभिलिखितान्याहुः सर्वभूतानि कर्मणा ॥ ११-७-१२ (६४९५६)
रथः शरीरं भूतानां सत्वमाहुस्तु सारथिम् ।
इन्द्रियाणि हयानाहुः कर्मबुद्धिस्तु रश्मयः ॥ ११-७-१३ (६४९५७)

तेषां हयानां यो वेगं धावतामनु धावति ।
सतु संसारचक्रेऽस्मिंश्चक्रवत्परिवर्तते ॥ ११-७-१४ (६४९५८)
यस्तान्संयमते बुद्ध्या संयतो न निवर्तते ।
यस्तु संसारचक्रेऽस्मिंश्चक्रवत्परिवर्तते ॥ ११-७-१५ (६४९५९)
श्भ्रममाणा न मुह्यन्ति संसारे न भ्रमन्ति ते ।
संसारे भ्रमतां राजन्दुःखमेतद्धि जायते ॥ ११-७-१६ (६४९६०)
तस्पादस्य निवृत्त्यर्थं यत्नमेवाचरेद्बुधः ।
उपेक्षा नात्र कर्तव्या शतशाखः प्रवर्धते ॥ ११-७-१७ (६४९६१)
यतेन्द्रियो नरो राजन्क्रोधलोभनिराकृतः ।
सन्तुष्टः सत्यवादी यः स शान्तिमधिगच्छति ॥ ११-७-१८ (६४९६२)
याम्यमाहू रथं ह्येनं मुह्यन्ते येन दुर्बुधाः ।
स चैतत्प्राप्नुयाद्राजन्यत्त्वं प्राप्तो नराधिप ॥ ११-७-१९ (६४९६३)
अनुतर्षुलमेवैतद्दुःखं भवति मारिष ।
राज्यनाशः सुहृन्नाशः सुतनाशश्च भारत ।
साधुः परमदुःखानां दुःखभैषज्यमारभेत् ॥ ११-७-२० (६४९६४)
ज्ञानौषधमवाप्येह दूरपारं महौषधम् ।
छिन्द्याद्दुःखमहाव्याधिं नरः संयतमानसः ॥ ११-७-२१ (६४९६५)
न विक्रमो न चाप्यर्थो न मित्रं न सुहृज्जनः ।
तस्मान्मोचयते दुःखाद्यथात्मा स्थिरनिश्चयः ॥ ११-७-२२ (६४९६६)
तस्मान्मैत्रं समास्थाय शीलमापदि भारत ।
दमस्त्यागोऽप्रमादश्च ते त्रयो ब्रह्मणो हयाः ॥ ११-७-२३ (६४९६७)
शीलरश्मिसमायुक्ते स्थितो यो मानसे रथे ।
त्यक्त्वा मृत्युभयं राजन्ब्रह्मलोकं स गच्छति ॥ ११-७-२४ (६४९६८)
अभयं सर्वभूतेभ्यो यो ददाति महीपते ।
स गच्छति परं स्थानं विष्णोः पदमनामयम् ॥ ११-७-२५ (६४९६९)
न तत्क्रतुसहस्रेण नोपवासैश्च नित्यशः ।
अभयस्य च दानेन यत्फलं प्राप्नुयान्नरः ॥ ११-७-२६ (६४९७०)
न ह्यात्मनः प्रियतरं किञ्चिद्भूतेषु निश्चितम् ।
अनिष्टं सर्वभूतानां मरणं नाम भारत ॥ ११-७-२७ (६४९७१)
तस्मात्सर्वेषु भूतेषु दया कार्या विपश्चिता ॥ ११-७-२८ (६४९७२)
नानायोगसमायुक्ता बुद्धिजालेन संवृताः ।
असूक्ष्मदृष्टयो मन्दा भ्राम्यन्ते तत्रतत्र ह ।
सुसूक्ष्मदृष्टयो राजन्व्रजन्ति ब्रह्मसाम्यताम् ॥ ११-७-२९ (६४९७३)
एवं ज्ञात्वा महाप्राज्ञ स तेषामौर्ध्वदैहिकम् ।
कर्तुमर्हति तेनैव फल प्राप्स्यति वै भवान् ॥ ॥ ११-७-३० (६४९७४)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-७-३ श्रमाच्छ्रान्त इति झ पाठः ॥
११-७-८ वार्यमाणाश्च भारतेति झ पाठः ॥
११-७-९ अथापि तैर्न मुच्येतेति क पाठः ॥
११-७-१० मज्जमांसमहापङ्के इति झ पाठः ॥
११-७-१७ ये तु संसारचक्रेऽस्मिन्निति झ पाठः ॥
११-७-१५ शतशास्वः संसारवृक्षः ॥
११-७-१७ क्रोधलोभौ निराकृतौ येन सः ॥
११-७-१८ याम्यं योमलोकप्रापकं संसारगहनम् ॥
११-७-१९ अनुतर्षुलं तृष्णाशीलं लक्षीकृत्य
। अनुकर्षणमेनैतद्दुःखं न भवति भारतेति क छ पाठः ॥
११-७-२० दूरपारं ब्रह्मज्ञानम् ॥
११-७-२३ ब्रह्मणः ब्रह्मलोकस्य प्रापका इति शेषः ॥
११-७-७ सप्तमोऽध्यायः ॥

स्त्रीपर्व - अध्याय ००८
॥ श्रीः ॥
११.८. अध्यायः ८

Mahabharata - Strii Parva - Chapter Topics

व्यासेन धृतराष्ट्रस्य शोकापनोदनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-८-० (६४९७५)
वैशम्पायन उवाच । ११-८-०क्ष् (५३२६)
विदुरस्य तु तद्वाक्यं निशम्य कुरुसत्तमः ।
पुत्रशोकाभिसन्तप्तः पपात भुवि मूर्छितः ॥ ११-८-१ (६४९७६)
तं तथा पतितं भूमौ निःसंज्ञं प्रेक्ष्य बान्धवाः ।
कृष्णद्वैपायनश्चैव क्षत्ता च विदुरस्तथा ॥ ११-८-२ (६४९७७)
सञ्जयः सुहृदश्चान्ये द्वास्था ये चास्य सम्मताः ।
जलेन सुखशीतेन तालवृन्तैश्च भारत ॥ ११-८-३ (६४९७८)
पस्पर्शुश्च करैर्गात्रं वीजमानाश्च यत्नतः ।
अन्वासत चिरं कालं धृतराष्ट्रं तथाविधम् ॥ ११-८-४ (६४९७९)

अथ दीर्घस्य कालस्य लब्धसञ्ज्ञो महीपतिः ।
विललाप चिरं कालं पुत्राधिभिरभिप्लुतः ॥ ११-८-५ (६४९८०)
धिगस्तु खलु मानुष्यं मानुष्ये च परिग्रहम् ।
यतोमूलानि दुःखानि सम्भवन्ति पुनःपुनः ॥ ११-८-६ (६४९८१)
मित्रनाशेऽर्थनाशे च ज्ञातिसम्बन्धिनामपि ।
प्राप्यते सुमहद्दुःखं विषाग्निप्रतिमं विभो ॥ ११-८-७ (६४९८२)
येन दह्यन्ति गात्राणि येन प्रज्ञा विनश्यति ।
येनाभिभूतः पुरुषो मरणं प्रतिपद्यते ॥ ११-८-८ (६४९८३)
तदिदं मरणं प्राप्तं मया भाग्यविपर्ययात् ।
श्तस्यान्तं नाधिगच्छामि ऋते प्राणविमोक्षणात्घ ११-८-९ (६४९८४)
तच्चैवाहं करिष्यामि अद्यैव द्विजसत्तम ।
इत्युक्त्वा तु महात्मानं पितरं ब्रह्मवित्तमम् ॥ ११-८-१० (६४९८५)
धृतराष्ट्रोऽभवन्मूढः स शोकं परमं गतः ।
अभूच्च तूष्णीं राजाऽसौ ध्यायमानो महीपतिः ॥ ११-८-११ (६४९८६)
तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनः प्रभुः ।
पुत्रशोकाभिसन्तप्तं पुत्रं वचनमब्रवीत् ॥ ११-८-१२ (६४९८७)
व्यास उवाच। ११-८-१३क्ष् (५३२७)
धृतराष्ट्र महाबाहो शृणु वक्ष्यामि पुत्रक ।
श्रुतवानसि मेधावी धर्मार्थकुशलः प्रभो ॥ ११-८-१३ (६४९८८)
न तेऽस्त्यविदितं किञ्चिद्वेदितव्यं परन्तप ।
अनित्यतां हि भूतानां विजानासि न संशयः ॥ ११-८-१४ (६४९८९)
अध्रुवे जीवलोके च स्थाने वा शाश्वते सति ।
जीविते मरणान्ते च कस्माच्छोचसि पुत्रक ॥ ११-८-१५ (६४९९०)
प्रत्यक्षं तव राजेन्द्र वैरस्यास्य समुद्भवः ।
पुत्रं ते कारणं कृत्वा कालयोगेन निर्मितः ॥ ११-८-१६ (६४९९१)
अवश्यं भवितव्ये च कुरूणां सङ्क्षये नृप ।
कस्माच्छोचसि ताञ्शूरान्गतान्परमिकां गतिम् ॥ ११-८-१७ (६४९९२)
जानता च महाबाहो विदुरेण महात्मना ।
यतितं सर्वयत्नेन शमं प्रति जनेश्वर ॥ ११-८-१८ (६४९९३)
न च दैवकृतो मार्गः शक्यो भूतेन केनचित् ।
घटताऽपि चिरं कालं नियन्तुमिति मे मतिः ॥ ११-८-१९ (६४९९४)
देवतानां हि यत्कार्यं मया प्रत्यक्षतः श्रुतम् ।
तत्तेऽहं सम्प्रवक्ष्यामि यथा स्थैर्यं भवेत्तव ॥ ११-८-२० (६४९९५)
पुराऽहं परितो यातः सभामैन्द्रीं जितक्लमः ।
अपश्यं तत्र च सदा समवेतान्दिवौकसः ॥ ११-८-२१ (६४९९६)
नारदप्रमुखांश्चापि सर्वान्देवर्षिसत्तमान् ।

तत्र चापि मया दृष्टा पृथिवी पृथिवीपते ॥ ११-८-२२ (६४९९७)
कार्यार्थमुपसम्पन्ना देवतानां समीपतः ।
उपगम्य तदा धात्री देवानाह समागतान् ॥ ११-८-२३ (६४९९८)
यत्कार्यं मम युष्माभिर्ब्रह्मणः सदने तदा ।
प्रतिज्ञातं महाभागास्तच्छीघ्रं संविधीयताम् ॥ ११-८-२४ (६४९९९)
तस्यास्तद्वचनं श्रुत्वा विष्णुर्लोकनमस्कृतः ।
उवाच वाक्यं प्रहसन्प्रभुस्तां देवसंसदि ॥ ११-८-२५ (६५०००)
धृतराष्ट्रस्य पुत्राणां यस्तु ज्येष्ठः शतस्य वै ।
दुर्योधन इति ख्यातः स ते कार्यं करिष्यति ॥ ११-८-२६ (६५००१)
तं च प्राप्य महीपालं कृतकृत्या भविष्यसि ।
तस्यार्थे पृथिवीपालाः कुरुक्षेत्रं समागताः ॥ ११-८-२७ (६५००२)
अन्योन्यं घातयिष्यन्ति दृढैः शस्त्रैः प्रहारिणः ।
ततस्ते भविता देवि भारस्य युधि नाशनम् ॥ ११-८-२८ (६५००३)
गच्छ शीघ्रं स्वकं स्थानं लोकान्धारय शोभने ।
स एष ते सुतो राजँल्लोकसंहारकारणात् ॥ ११-८-२९ (६५००४)
कलेरंशः समुत्पन्नो गान्धार्या जठरे नृप ।
अमर्षी बलवाञ्शूरः क्रोधनो दुष्प्रसाधनः ॥ ११-८-३० (६५००५)
दैवयोगात्समुत्पन्ना भ्रातरस्तस्य तादृशाः ।
शकुनिर्मातुलश्चैव कर्णश्च परमः सखा ॥ ११-८-३१ (६५००६)
समुत्पन्ना विनाशार्थं पृथिव्यां सहिता नृपाः ।
श्यादृशो जायते राजा तादृशोऽस्य जनो भवेत् ॥ ११-८-३२ (६५००७)
अधर्मो धर्मतां याति स्वामी चेद्धार्मिको भवेत् ।
स्वामिनो गुणदोषाभ्यां भृत्याः स्युर्नात्र संशयः ॥ ११-८-३३ (६५००८)
दुष्टं राजानमासाद्य गतास्ते तनया नृप ॥
एतमर्थं महाबाहो नारदो वेद तत्त्ववित् ॥ ११-८-३४ (६५००९)
आत्मापराधात्पुत्रास्ते विनष्टाः पृथिवीपते ।
मा ताञ्शोचस्व राजेन्द्र न हि शोकेऽस्ति कारणम् ॥ ११-८-३५ (६५०१०)
न हि ते पाण्डवाः स्वल्पमपराध्यन्ति भारत ।
पुत्रास्तव दुरात्मानो यैरियं घातिता मही ॥ ११-८-३६ (६५०११)
नारदेन च भद्रं ते पूर्वमेव न संशयः ।
युधिष्ठिरस्य समितौ राजसूये निवेदितम् ॥ ११-८-३७ (६५०१२)
पाण्डवाः कौरवाः सर्वे समासाद्य परस्परम् ।
नभविष्यन्ति कौन्तेय यत्ते कृत्यं तदाचर ॥ ११-८-३८ (६५०१३)
नारदस्य वचः श्रुत्वा तथाऽकुर्वत पाण्डवाः ।
एतत्ते सर्वमाख्यातं देवगुह्यं सनातनम् ॥ ११-८-३९ (६५०१४)
कथं ते शोकनाशः स्यात्प्राणेषु च दया प्रभो ।

स्नेहश्च पाण्डुपुत्रेषु ज्ञात्वा दैवकृतं विधिम् ॥ ११-८-४० (६५०१५)
एष चार्थो महाबाहो पूर्वमेव मया श्रुतः ।
कथितो धर्मराजस्य राजसूये कुरूत्तम ॥ ११-८-४१ (६५०१६)
यतितं धर्मपुत्रेण मया गुह्ये निवेदिते ।
अविग्रहे कौरवाणां दैवं तु बलवत्तरम् ॥ ११-८-४२ (६५०१७)
अनतिक्रमणीयो हि विधी राजन्कथञ्चन ।
कृतान्तस्य तु भूतेन स्थावरेण चरेण च ॥ ११-८-४३ (६५०१८)
भवान्धर्मपरो यत्र बुद्धिश्रेष्ठश्च भारत ।
मुह्यते प्राणिनां ज्ञात्वा गतिं चागतिमेव च ॥ ११-८-४४ (६५०१९)
त्वां तु शोकेन सन्तप्तं मुह्यमानं मुहुर्मुहुः ।
ज्ञात्वा युधिष्ठिरो राजा प्राणानपि परित्यजेत् ॥ ११-८-४५ (६५०२०)
कृपालुर्नित्यशो वीरस्तिर्यग्योनिगतेष्वपि ।
स कथं त्वयि राजेन्द्र कृपां नैव करिष्यति ॥ ११-८-४६ (६५०२१)
मम चैव नियोगेन विधेश्चाप्यनिवर्तनाम् ।
पाण्डवानां च कारुण्यात्प्राणान्धारय भारत ॥ ११-८-४७ (६५०२२)
एवं ते वर्तमानस्य लोके कीर्तिर्भविष्यति ।
धर्मार्थः सुमहांस्तात तप्तं स्याच्च तपश्चिरात् ॥ ११-८-४८ (६५०२३)
पुत्रशोकं समुत्पन्नं हुताशं ज्वलितं यथा ।
प्रज्ञाम्भसा महाराज निर्वापय सदा सता ॥ ११-८-४९ (६५०२४)
वैशम्पायन उवाच। ११-८-५०क्ष् (५३२८)
तच्छ्रुत्वा तस्य वचनं व्यासस्यामिततेजसः ।
मुहूर्तं समनुध्यायन्धृतराष्ट्रोऽभ्यभाषत ॥ ११-८-५० (६५०२५)
महता शोकजालेन प्रणुन्नोऽस्मि द्विजोत्तम ।
नात्मानमवबुध्यामि मुह्यमानो मुहुर्मुहुः ॥ ११-८-५१ (६५०२६)
इदं तु वचनं श्रुत्वा तव देवनियोगजम् ।
धारयिष्याम्यहं प्राणान्यतिष्ये च न शोचितुं ॥ ११-८-५२ (६५०२७)
एतच्छ्रुत्वा तु वचनं व्यासः सत्यवतीसुतः ।
धृतराष्ट्रस्य राजेन्द्र तत्रैवान्तरधीयत ॥ ॥ ११-८-५३ (६५०२८)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि अष्टमोऽध्यायः
॥ ८ ॥क

Mahabharata - Strii Parva - Chapter Text

११-८-० (६५०२९)
श्जनमेजय उवाच। ११-८-०क्ष् (५३२९)
गते भगवति व्यासे धृतराष्ट्रो महीपतिः ।

किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि ॥ ११-८-१ (६५०३०)
तथैव कौरवो राजा धर्मपुत्रो महामनाः ।
कृपप्रभृतयश्चैव किमकुर्वत ते त्रयः ॥ ११-८-२ (६५०३१)
अश्वत्थाम्नः श्रुतं कर्म शापश्चान्योन्यकारितः ।
वृत्तान्तमुत्तरं ब्रूहि यदभाषत सञ्जयः ॥ ११-८-३ (६५०३२)
वैशम्पायन उवाच। ११-८-४क्ष् (५३३०)
हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
सञ्जयो विगतप्रज्ञो धृतराष्ट्रमुपस्थितः ॥ ११-८-४ (६५०३३)
सञ्जय उवाच। ११-८-५क्ष् (५३३१)
आगम्य नानादेशेभ्यो नानाजनपदेश्वराः ।
पितृलोकं गता राजन्सर्वे तव सुतैः सह ॥ ११-८-५ (६५०३४)
याच्यमानेन सततं तव पुत्रेण भारत ।
घातिता पृथिवी सर्वा वैरस्यान्तं विधित्सता ॥ ११-८-६ (६५०३५)
पुत्राणामथ पौत्राणां पितॄणां च महीपते ।
आनुपूर्व्येण सर्वेषां प्रेतकार्याणि कारय ॥ ११-८-७ (६५०३६)
वैशम्पायन उवाच। ११-८-८क्ष् (५३३२)
तच्छ्रुत्वा वचनं घोरं सञ्जयस्य महीपतिः ।
गतासुरिव निश्चेष्टो न्यपतत्पृथिवीतले ॥ ११-८-८ (६५०३७)
तं शयानमुपागम्य पृथिव्यां पृथिवीपतिम् ।
विदुरः सर्वधर्मज्ञ इदं वचनमब्रवीत् ॥ ११-८-९ (६५०३८)
उत्तिष्ठ राजन्किं शेषे मा शुचो भरतर्षभ ।
एषा वै सर्वसत्वानां लोकेश्वर परा गतिः ॥ ११-८-१० (६५०३९)
अभावादीनि भूतानि भावमध्यानि भारत ।
अभावनिधनान्येव तत्र का परिदेवना ॥ ११-८-११ (६५०४०)
न शोचन्मृतमन्वेति न शोचन्म्रियते नरः ।
एवं सांसिद्धिके लोके किमर्थमनुशोचसि ॥ ११-८-१२ (६५०४१)
अयुध्यमानो म्रियते युध्यमानस्तु जीवति ।
कालं प्राप्य महाराज न कश्चिदतिवर्तते ॥ ११-८-१३ (६५०४२)
कालः कर्षति भूतानि सर्वाणि विविधानि च ।
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ॥ ११-८-१४ (६५०४३)
यथा वायुस्तृणाग्राणि संवर्तपति सर्वतः ।
तथा कालवशं यान्ति भूतानि भरतर्षभ ॥ ११-८-१५ (६५०४४)
एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्य कालः प्रयात्यग्रे तत्र का परिदेवना ॥ ११-८-१६ (६५०४५)
यांश्चापि निहतान्युद्धे राजंस्त्वमनुशोचसि ।
न शोच्या हि माहत्मानः सर्वे ते त्रिदिवं गताः ॥ ११-८-१७ (६५०४६)

न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया ।
तथा स्वर्गमुपायान्ति यथा शूरास्तनुत्यजः ॥ ११-८-१८ (६५०४७)
सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ।
सर्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना ॥ ११-८-१९ (६५०४८)
शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः ।
हूयमानाञ्शरांश्चैव सेहुरुत्तमपूरषाः ॥ ११-८-२० (६५०४९)
एवं राजंस्तवाचक्षे स्वर्ग्यं पन्थानमुत्तमम् ।
न युद्धादधिकं किञ्चित्क्षत्रियस्येह विद्यते ॥ ११-८-२१ (६५०५०)
क्षत्रियास्ते महात्मानः शूराः समितिशोभनाः ।
आशिषं परमां प्राप्ता न शोच्याः सर्व एव हि ॥ ११-८-२२ (६५०५१)
आत्मनाऽऽत्मानमाश्वास्य मा शुचः पुरुषर्षभ ।
नाद्य शोकाभिभूतस्त्वं कार्यमुत्स्रष्टुमर्हसि ॥ ॥ ११-८-२३ (६५०५२)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि अध्यायः ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-८-२९ कालः संहारकारणादिति क छ ट पाठः ॥
११-८-३७ नारदेन समाख्यातमिति क छ ट पाठः ॥
११-८-३९ तदाऽशोचन्त पाण्डवा इति झ पाठः ॥
११-८-४८ धर्मश्च सुमहास्तात तप्तस्य तपसश्चिरादिति
क छ ट पाठः ॥
११-८-८ अष्टमोऽध्यायः ॥

स्त्रीपर्व - अध्याय ००९
॥ श्रीः ॥
११.९. अध्यायः ९

Mahabharata - Strii Parva - Chapter Topics
धृतराष्ट्रेण गान्धरीप्रभृतिभिः स्त्रीभिः सह मृतजनावलोकनाय
रणाङ्गणम्प्रति प्रयाणम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-९-० (६५०५३)
्जनमेजय उवाच। ११-९-०क्ष् (५३३३)
गते व्यासे तु धर्मात्मा धृतराष्ट्रो महीपतिः ।

किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि ॥ ११-९-१ (६५०५४)
वैशम्पायन उवाच। ११-९-२क्ष् (५३३४)
एतच्छ्रुत्वा नरश्रेष्ठश्चिरं ध्यात्वा त्वचेतनः ।
सञ्जयं योजयेत्युक्त्वा विदुरं प्रत्यभाषत ॥ ११-९-२ (६५०५५)
क्षिप्रमानय गान्धारीं सर्वाश्च भरतस्त्रियः ।
कुन्तीं चैव तथा क्षत्तः समानय ममाऽन्तिकम्'॥ ११-९-३ (६५०५६)
एवमुक्त्वा स धर्मात्मा विदुरं धर्मवित्तमम् ।
शोकविप्रहतज्ञानो यानमेवान्वरोहत ॥ ११-९-४ (६५०५७)
गान्धारी पुत्रशोकार्ता भर्तुर्वचननोदिता ।
सह कुन्त्या यतो राजा सह स्त्रीभिरुपाद्रवत् ॥ ११-९-५ (६५०५८)
ताः समासाद्य राजानं भृशं शोकसमन्विताः ।
आमन्त्र्यान्योन्यमायस्ता भृशमुच्चुक्रुशुस्ततः ॥ ११-९-६ (६५०५९)
ताः समाश्वासयत्क्षत्ता ताभ्यश्चार्ततरः स्वयम् ।
अश्रुकण्ठीः समारोप्य ततोऽसौ निर्ययौ पुरात् ॥ ११-९-७ (६५०६०)
ततः प्रणादः सञ्जज्ञे सर्वेषु कुरुवेश्मसु ।
आकुमारं पुरं सर्वमभवच्छोककर्शितम् ॥ ११-९-८ (६५०६१)
अदृष्टपूर्वा या नार्यः पुरा देवगणैरपि ।
पृथग्जनेन दृश्यन्ते तास्तदा निहतेश्वराः ॥ ११-९-९ (६५०६२)
प्रकीर्य केशान्सुशुभान्भूषणान्यवमुच्य च ।
एकवस्त्रधरा नार्यः परिपेतुरनाथवत् ॥ ११-९-१० (६५०६३)
श्वेतपर्वतरूपेभ्यो गृहेभ्यस्ता निराक्रमन् ।
गुहाभ्य इव शैलानां पृषत्यो हतयूथपाः ॥ ११-९-११ (६५०६४)
तान्युदीर्णानि नारीणां तदा वृन्दान्यनेकशः ।
शोकार्तान्यद्रवन्राजन्किशोरीणामिवाङ्गणे ॥ ११-९-१२ (६५०६५)
प्रगृह्य बाहून्क्रोशन्त्यः पुत्रान्भ्रातॄन्पितॄनपि ।
दर्शयन्ति हता हि स्म युगान्ते लोकसङ्क्षयम् ॥ ११-९-१३ (६५०६६)
विलपन्त्यो रुदन्त्यश्च धावमानास्ततस्ततः ।
शोकेनोपहतज्ञाताः कर्तव्यं न प्रजज्ञिरे ॥ ११-९-१४ (६५०६७)
व्रीडां जग्मुः पुरा याः स्म सखीनामपि योषितः ।
ता एकवस्त्रा निर्लज्जाः श्वश्रूणां पुरतोऽभवन् ॥ ११-९-१५ (६५०६८)
परस्परं सुसूक्ष्मेषु शोकेष्वाश्वासयन्ति याः ।
ताः शोकविह्वला राजन्नवैक्षन्त परस्परम् ॥ ११-९-१६ (६५०६९)
ताभिः परिवृतो राजा रुदतीभिः सहस्रशः ।
निर्ययौ नगराद्दीनस्तूर्णमायोधनं प्रति ॥ ११-९-१७ (६५०७०)
शिल्पिनो वणिजो वैश्याः सर्वे कर्मोपजीविनः ।
ते पार्थिवं पुरस्कृत्य निर्ययुर्नगराद्बहिः ॥ ११-९-१८ (६५०७१)

तेषां विक्रोशमानानामार्तानां कुरुसङ्क्षये ।
प्रादुरासीन्महाञ्शब्दो व्यथयन्भुवनान्युत ॥ ११-९-१९ (६५०७२)
युगान्तकाले सम्प्राप्ते भूतानां दह्यतामिव ।
अभावस्योदयः प्राप्त इति भूतानि मेनिरे ॥ ११-९-२० (६५०७३)
भृशमुद्विग्नमनसस्ते पौराः कुरुसङ्क्षये ।
प्राक्रोशन्त महाराज स्वनुरक्तास्तदा भृशम् ॥ ॥ ११-९-२१ (६५०७४)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि नवमोऽध्यायः ॥ ९ ॥
Mahabharata - Strii Parva - Chapter Text

११-९-० (६५०७५)
वैशम्पायन उवाच। ११-९-०क्ष् (५३३५)
विदुरस्य तु तद्वाक्यं श्रुत्वा तु पुरुषर्षभः ।
युज्यतां यानमित्युक्त्वा पुनर्वचनमब्रवीत् ॥ ११-९-१ (६५०७६)
धृतराष्ट्र उवाच। ११-९-२क्ष् (५३३६)
११-९-२ (६५०७७)
शीघ्रमानय गान्धारीं सर्वाश्च भरतस्त्रियः ।
वधूं कुन्तीमुपादाय याश्चान्यास्तत्र योषितः ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-९-४ विगता प्रज्ञा व्यासदत्तं दिव्यज्ञानं यस्य स विगतप्रज्ञः ॥
११-९-७ समारोप्य वाहनेष्विति शेषः ॥
११-९-११ शोकस्यातिगाढत्वात्पुनर्विदुरेणोक्तं अभावदीनीत्यादि ॥
११-९-१५ संवर्तयति वर्तुलयति कम्पयति वा ॥
११-९-२१ आचक्षे कथयामि ॥
११-९-२३ कार्यं अवश्यकर्तव्यमुदकदानादि ॥
११-९-११ पृषत्यश्चित्रहरिण्यः ॥
११-९-१२ अङ्गमे नृत्यशिक्षाभूमौ ॥
११-९-९ नवमोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१०
॥ श्रीः ॥
११.१०. अध्यायः १०

Mahabharata - Strii Parva - Chapter Topics
मृतबन्धुदिदृक्षया समरभूमिं गच्छतो धृतराष्ट्रस्य

मध्येमार्गं कृपकृतवर्मद्रौणिभिः समागमः ॥ १ ॥
तेषां त्रयाणां धृतराष्ट्राश्वासनपूर्वकंस्वाभिमतदेशगमनम् ॥ २ ॥

Mahabharata - Strii Parva - Chapter Text

११-१०-० (६५०७८)
वैशम्पायन उवाच। ११-१०-०क्ष् (५३३७)
क्रोशमात्रं ततो गत्वा ददृशुस्तान्महारथान् ।
शारद्वतं कृपं द्रौणिं कृतवर्माणमेव च ॥ ११-१०-१ (६५०७९)
ते तु दृष्ट्वैव राजानं प्रज्ञाचक्षुषमीश्वरम् ।
अश्रुकण्ठा विनिःश्वस्य रुदन्तमिदमब्रुवन् ॥ ११-१०-२ (६५०८०)
पुत्रस्तव महाराज कृत्वा कर्म सुदुष्करम् ।
गतः सानुचरो राजञ्शक्रलोकं महीपते ॥ ११-१०-३ (६५०८१)
दुर्योधनबलान्मुक्ता वयमेव त्रयो रथाः ।
सर्वमन्यत्परिक्षीणं सैन्यं ते भरतर्षभ ॥ ११-१०-४ (६५०८२)
इत्येवमुक्त्वा राजानं कृपः शारद्वतस्ततः ।
गान्धारीं पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ११-१०-५ (६५०८३)
अभीता युध्यमानास्ते घ्नन्तः शत्रुगणान्बहून् ।
वीरकर्माणि कुर्वाणाः पुत्रास्ते निधनं गताः ॥ ११-१०-६ (६५०८४)
ध्रुवं सम्प्राप्य लोकांस्ते निर्मलाञ्शस्त्रनिर्जितान् ।
भास्वरं देहमास्थाय विहरन्त्यमरा इव ॥ ११-१०-७ (६५०८५)
सर्वे ह्यभिमुखा राज्ञि युध्यमाना हता युधि ।
न हि कश्चिद्धि शूराणां युध्यमानः पराङ्मुखः ।
शस्त्रेण निधनं प्राप्तो न च कश्चित्कृताञ्जलिः ॥ ११-१०-८ (६५०८६)
एतां तां क्षत्रियस्याहुः पुराणाः परमां गतिम् ।
शस्त्रेण निधनं सङ्ख्ये तान्न शोचितुमर्हसि ॥ ११-१०-९ (६५०८७)
न चापि शत्रवस्तेषां मुच्यन्ते राज्ञि पाण्डवाः ।
शृणु यत्कृतमस्माभिरश्वत्थामपुरोगमैः ॥ ११-१०-१० (६५०८८)
अधर्मेण हतं श्रुत्वा भीमसेनेन ते सुतम् ।
सुप्तं शिबिरमासाद्य पाण्डूनां कदनं कृतम् ॥ ११-१०-११ (६५०८९)
पाञ्चाला निहताः सर्वे धृष्टद्युम्नपुरोगमाः ।
द्रुपदस्यात्मजाश्चैव द्रौपदेयाश्च पातिताः ॥ ११-१०-१२ (६५०९०)
तथा विशसनं कृत्वा पुत्रशत्रुगणस्य ते ।
प्राद्रवाम रणे स्थातुं न हि शक्ष्यामहे त्रयः ॥ ११-१०-१३ (६५०९१)
ते हि शूरा महेष्वासाः क्षिप्रमेष्यन्ति पाण्डवाः ।
अमर्षवशमापन्ना वैरं प्रतिजिहीर्षवः ॥ ११-१०-१४ (६५०९२)

ते हतानात्मजाञ्श्रुत्वा प्रमत्ताः पुरुषर्षभाः ।
अन्विष्यन्तः पदं शूराः क्षिप्रमेष्यन्ति पाण्डवाः ॥ ११-१०-१५ (६५०९३)
तेषां तु किल्बिषं कृत्वा संस्थातुं नोत्सहामहे ।
अनुजानीहि नो राज्ञि मा च शोके मनः कृथाः ॥ ११-१०-१६ (६५०९४)
राजंस्त्वमनुजानीहि धैर्यमातिष्ठ चोत्तमम् ।
दिष्टान्तं पश्य चापि त्वं क्षात्रं धर्मं च केवलम् ॥ ११-१०-१७ (६५०९५)
इत्येवमुक्त्वा राजानं कृत्वा चाभिप्रदक्षिणम् ।
कृपश्च कृतवर्मा च द्रोणपुत्रश्च भारत ॥ ११-१०-१८ (६५०९६)
अवेक्षमाणा राजानं धृतराष्ट्रं मनीषिणम् ।
गङ्गामनु महाराज तूर्णमश्वानचोदयन् ॥ ११-१०-१९ (६५०९७)
अपक्रम्य तु ते राजन्सर्व एव महारथाः ।
आमन्त्र्यान्योन्यमुद्विग्नास्त्रिधा ते प्रययुस्तदा ॥ ११-१०-२० (६५०९८)
जगाम हास्तिनपुरं कृपः शारद्वतस्तदा ।
स्वमेव राष्ट्रं हार्दिक्यो द्रौणिर्व्यासाश्रमं ययौ ॥ ११-१०-२१ (६५०९९)
एवं ते प्रययुर्वीरा वीक्षमाणाः परस्परम् ।
भयार्ताः पाण्डुपुत्राणामागस्कृत्वा महात्मनाम् ॥ ११-१०-२२ (६५१००)
समेत्य वीरा राजानं तदा त्वनुदिते रवौ ।
विप्रजग्मुर्महात्मानो यथेष्टकमरिन्दमाः ॥ ११-१०-२३ (६५१०१)
श्समासाद्याथ वै द्रौणिं पाण्डुपुत्रा महारथाः ।
व्यजयंस्ते रणे राजन्विक्रम्य तदनन्तरम् ।ह ॥ ११-१०-२४ (६५१०२)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि दशमोऽध्यायः ॥ १० ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-१०-१४ वैरं प्रतिचिकीर्षव इति क पाठः ॥
११-१०-१७ दिष्टान्तं मरणम् ॥
११-१०-२४ तदनन्तरं कृपाचार्यकृतवर्मभ्यां वियोगानन्तरम् ॥
११-१०-१० दशमोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०११
॥ श्रीः ॥
११.११. अध्यायः ११

Mahabharata - Strii Parva - Chapter Topics

युधिष्ठिरेण कृष्णादिभिः सह धृतराष्ट्रसमीपमेत्याभिवादनम् ॥ १ ॥

धृतराष्ट्रेण युधिष्ठिरं मृदुलमालिङ्ग्य पश्चाद्भावज्ञेन
कृष्णेन पुरतः स्थापितलोहभीमस्य दृढालिङ्गनेन भञ्जनम्
॥ २ ॥

Mahabharata - Strii Parva - Chapter Text

११-११-० (६५१०३)
वैशम्पायन उवाच। ११-११-०क्ष् (५३३८)
हतेषु सर्वसैन्येषु धर्मराजो युधिष्ठिरः ।
शुश्रुवे पितरं वृद्धं निर्यान्तं गजसाह्वयात् ॥ ११-११-१ (६५१०४)
सोऽभ्ययात्पुत्रशोकार्तं पुत्रशोकपरिप्लुतः ।
शोचमानो महाराज भ्रातृभिः सहितस्तदा ॥ ११-११-२ (६५१०५)
अन्वीयमानो वीरेण दाशार्हेण महात्मना ।
युयुधानेन च तथा तथैव च युयुत्सुना ॥ ११-११-३ (६५१०६)
तमन्वगात्सुदुःखार्ता द्रौपदीशोककर्शिता ।
सह पाञ्चालयोषिद्भिर्यास्तत्रासन्समागताः ॥ ११-११-४ (६५१०७)
सङ्ग्राममनु बृन्दानि स्त्रीणां भरतसत्तम् ।
कुररीणामिवार्तानां क्रोशन्तीनां ददर्श ह ॥ ११-११-५ (६५१०८)
ताभिः परिवृतो राजा क्रोशन्तीभिः सहस्रशः ।
ऊर्ध्वबाहुभिरार्ताभी रुदतीभिः प्रियाप्रियैः ॥ ११-११-६ (६५१०९)
क नु धर्मज्ञता राज्ञः क्व नु साद्यानृशंसता ।
यच्चावधीत्पितॄन्भ्रातॄन्गुरुपुत्रान्सखीनपि ॥ ११-११-७ (६५११०)
घातयित्वा कथं द्रोणं भीष्मं चापि पितामहम् ।
मनस्तेऽभून्महाबाहो हत्वा चापि जयद्रथम् ॥ ११-११-८ (६५१११)
किं नु राज्येन ते कार्यं पितॄन्भ्रातॄनपश्यतः ।
अभिमन्युं च दुर्धर्षं द्रौपदेयांश्च भारत ॥ ११-११-९ (६५११२)
वैशम्पायन उवाच। ११-११-१०क्ष् (५३३९)
अतीत्य ता महाबाहुः क्रोशन्तीः कुररीरिव ।
ववन्दे पितरं ज्येष्ठं धर्मराजो युधिष्ठिरः ॥ ११-११-१० (६५११३)
ततोऽभिवाद्य पितरं क्रमेणामित्रकर्शनाः ।
न्यवेदयन्त नामानि पाण्डवास्तेऽपि सर्वशः ॥ ११-११-११ (६५११४)
तमात्मजान्तकरणं पिता पुत्रवधार्दितः ।
अप्रीयमाणः शोकार्तः पाण्डवं परिषस्वजे ॥ ११-११-१२ (६५११५)
धर्मराजं परिष्वज्य सान्त्वयित्वा च भारत ।
दुष्टात्मा भीममन्वैच्छद्दिधक्षुरिव पावकः ॥ ११-११-१३ (६५११६)
स कोपपावकस्तस्य शोकवायुसमीरितः ।

भीमसेनमयं दावं दिधक्षुरिव दृश्यते ॥ ११-११-१४ (६५११७)
तस्य संकल्पमाज्ञाय भीमं प्रत्यशुभं हरिः ।
भीममाक्षिप्य पाणिभ्यां प्रददौ भीममायसम् ॥ ११-११-१५ (६५११८)
प्रागेव तु महाबुद्धिर्बुद्ध्वा तस्येङ्गितं हरिः ।
संविधानं महाप्राज्ञस्तत्र चक्रे जनार्दनः ॥ ११-११-१६ (६५११९)
उपगुह्यैव पाणिभ्यां भीमसेनमयस्मयम् ।
बभञ्ज बलवान्राजा मन्यमानो वृकोदरम् ॥ ११-११-१७ (६५१२०)
नागायुतसमप्राणः स राजा भीममायसम् ।
भङ्क्तत्वा विमथितोरस्कः सुस्राव रुधिरं मुखात् ॥ ११-११-१८ (६५१२१)
ततः पपात मेदिन्यां तथैव रुधिरोक्षितः ।
प्रपुष्पिताग्रशिखरः पारिजात इव द्रुमः ॥ ११-११-१९ (६५१२२)
प्रत्यगृह्णाच्च तं विद्वान्सूतो गावल्गणिस्तदा ।
मैवमित्यब्रवीच्चैनं शमयन्सान्त्वयन्निव ॥ ११-११-२० (६५१२३)
हतो भीम इति ज्ञात्वा गतमन्युर्महामनाः ।
हाहाभीमेति चुक्रोश नृपः शोकसमन्वितः ॥ ११-११-२१ (६५१२४)
तं विदित्वा गतक्रोधं भीमसेनवधार्दितम् ।
वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ॥ ११-११-२२ (६५१२५)
मा शुचो धृतराष्ट्र त्वं नैव भीमस्त्वया हतः ।
आयसी प्रतिमा ह्येषा त्वया निष्पातिता विभो ॥ ११-११-२३ (६५१२६)
त्वां क्रोधवशमापन्नं विदित्वा भरतर्षभ ।
मयाऽपकृष्टः कौन्तेयो मृत्योर्दंष्ट्रान्तरं गतः ॥ ११-११-२४ (६५१२७)
न हि ते राजशार्दूल बले तुल्योऽस्ति कश्चन ।
कः सहेत महाबाहो बाह्वोर्विग्रहणं नरः ॥ ११-११-२५ (६५१२८)
यथान्तकमनुप्राप्य जीवन्कश्चिन्न मुच्यते ।
एवं बाह्वन्तरं प्राप्य तव जीवेन्न कश्चन ॥ ११-११-२६ (६५१२९)
तस्मात्पुत्रेण या तेऽसौ प्रतिमा कारिताऽऽयसी ।
भीमस्य सेयं कौरव्य तवैवोपहृता मया ॥ ११-११-२७ (६५१३०)
पुत्रशोकाभिसन्तप्तं धर्मादपकृतं मनः ।
तव राजेन्द्र तेन त्वं भीमसेनं जिघांससि ॥ ११-११-२८ (६५१३१)
न त्वेतत्ते क्षमं राजन्हन्यास्त्वं यद्वृकोदरम् ।
न हि पुत्रा महाराज जीवेयुस्ते कथञ्चन ॥ ११-११-२९ (६५१३२)
तस्माद्यत्कृतमस्माभिर्मन्यमानैः शमं प्रति ।
अनुमन्यस्व तत्सर्वं मा च शोके मनः कृथाः ॥ ॥ ११-११-३० (६५१३३)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि एकादशोऽध्यायः
॥ ११ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-११-५ स गङ्गामन्विति झ पाठः ॥
११-११-६ प्रियाप्रियैः पाण्डवानां प्रियाः अभिमन्युप्रभृतयः अप्रियाः दुर्योधनादयः तैर्हेतुभिः क्रोशन्तीभिरिति सम्बन्धः ॥
११-११-१५ आक्षिप्य निवार्य । आयसं लोहमयम् ॥
११-११-२१ स तु कोपं समुत्सृज्येति झ पाठः ॥
११-११-२८ पुत्रेति धर्मादपकृतमालिङ्गनच्छलेन भीमवधः कर्तव्य इत्याशया ॥
११-११-११ एकादशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१२
॥ श्रीः ॥
११.१२. अध्यायः १२

Mahabharata - Strii Parva - Chapter Topics
कृष्णवाक्याद्गतमन्युना धृतराष्ट्रेण भीमादीनामालिङ्गनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-१२-० (६५१३४)
वैशम्पायन उवाच । ११-१२-०क्ष् (५३४०)
तत एनमुपातिष्ठञ्शौचार्थं परिचारकाः ।
कृतशौचं पुनश्चैनं ओवाच मधुसूदनः ॥ ११-१२-१ (६५१३५)
राजन्नधीता वेदास्ते शास्त्राणि विविधानि च ।
श्रुतानि च पुराणानि राजधर्माश्च केवलाः ॥ ११-१२-२ (६५१३६)
एवं विद्वान्महाप्राज्ञः समर्थः सन्बलाबले ।
आत्मापराधात्कस्मात्त्वं कुरुषे कोपमीदृशम् ॥ ११-१२-३ (६५१३७)
उक्तवांस्त्वां तदैवाहं भीष्मद्रोणौ च भारत ।
विदुरः सञ्जयश्चैव वाक्यं राजन्न तत्कृथाः ॥ ११-१२-४ (६५१३८)
स वार्यमाणो नास्माकमकार्षीर्वचनं तदा ।
पाण्डवानधिकाञ्चानन्बले शौर्ये च कौरव ॥ ११-१२-५ (६५१३९)
राजा हि यः स्थिरप्रज्ञः स्वयं दोषानवेक्षते ।
देशकालविभागं च परं श्रेयः स विन्दति ॥ ११-१२-६ (६५१४०)
उच्यमानस्तु यः श्रेयो गृह्णीते नो हिताहिते ।
आपदः समनुप्राप्य सोऽभ्येति विलयं किल ॥ ११-१२-७ (६५१४१)

ततोऽन्यवृत्तमात्मानं समवेक्षस्व भारत ।
राजंस्त्वं ह्यविधेयात्मा दुर्योधनवशे स्थितः ॥ ११-१२-८ (६५१४२)
आत्मापराधादापन्नस्तत्किं भीमं जिघांससि ।
तस्मात्संयच्छ कोपं त्वं स्वमनुस्मृत्य दुष्कृतम् ॥ ११-१२-९ (६५१४३)
यस्तु तां स्पर्धया क्षुद्रः पाञ्चालीमानयत्सभाम् ।
स हतो भीमसेनेन वैरं प्रतिजिहीर्षता ॥ ११-१२-१० (६५१४४)
आत्मनोऽतिक्रमं पश्य पुंत्रस्य च दुरात्मनः ।
यदनागसि पाण्डूनां परित्यागस्त्वया कृतः ॥ ११-१२-११ (६५१४५)
वैशम्पायन उवाच। ११-१२-१२क्ष् (५३४१)
एवमुक्तः स कृष्णेन सर्वं सत्यं जनाधिप ।
उवाच देवकीपुत्रं धृतराष्ट्रो महीपतिः ॥ ११-१२-१२ (६५१४६)
एवमेतन्महाबाहो यथा वदसि माधव ।
पुत्रस्नेहस्तु बलवान्धर्मान्मां समचालयत् ॥ ११-१२-१३ (६५१४७)
दिष्ट्या तु पुरुषव्याघ्रो बलवान्सत्यविक्रमः ।
त्वद्गुप्तो नागमत्कृष्ण भीमो बाह्वन्तरं मम ॥ ११-१२-१४ (६५१४८)
इदानीं त्वहमव्यग्रो गतमन्युर्गतज्वरः ।
मध्यमं पाण्डवं वीरं स्प्रष्टुमिच्छामि माधव ॥ ११-१२-१५ (६५१४९)
हतेषु पारथिवेन्द्रेषु पुत्रेषु निहतेषु च ।
पाण्डुपुत्रेषु मे धर्मः प्रीतिश्चाप्यवतिष्ठते ॥ ११-१२-१६ (६५१५०)
ततः स भीमं च धनञ्जयं च
माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
पस्पर्श गात्रैः प्ररुदन्सुगात्रा--
नाश्वास्य कल्याणमुवाच चैनान् ॥ ॥ ११-१२-१७ (६५१५१)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि द्वादशोऽध्यायः
॥ १२ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-१२-४ न तत्कृथाः ततन्न कृतवानरी । अडभाव आर्षः ॥
११-१२-७ श्रेयो हिताहिते उच्यमानो न गृहीत इत्यन्वयः ॥
११-१२-१० वैरं प्रतिचिकीर्षतेति क पाठः ॥
११-१२-११ अनागसि अपराधाभावे । परित्यागो राज्याप्रदानेन तिरस्कारः ॥
११-१२-१२ द्वादशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१३
॥ श्रीः ॥

११.१३. अध्यायः १३

Mahabharata - Strii Parva - Chapter Topics

कृष्णयुधिष्ठिरादिभिर्गान्धारीसमीपगमनम् ॥ १ ॥
गान्धारीं युधिष्ठिरंशप्तुकामां विज्ञाय पूर्वमेवागतेन व्यासेन गान्धार्याः कोपापनोदनम् ॥ २ ॥

Mahabharata - Strii Parva - Chapter Text

११-१३-० (६५१५२)
वैशम्पायन उवाच। ११-१३-०क्ष् (५३४२)
धृतराष्ट्राभ्यनुज्ञातास्ततस्ते कुरुपुङ्गवाः ।
अभ्ययुर्भ्रातरः सर्वे गान्धारीं सहकेशवाः ॥ ११-१३-१ (६५१५३)
ततो ज्ञात्वा हतामित्रं धर्मराजं युधिष्ठिरम् ।
गान्धारी पुत्रशोकार्ता शप्तुमैच्छदनिन्दिता ॥ ११-१३-२ (६५१५४)
तस्याः पापमभिप्रायं विदित्वा पाण्डवान्प्रति ।
ऋषिर्गन्धवतीपुत्रः प्रागेव समबुध्यत ॥ ११-१३-३ (६५१५५)
स गङ्गायामुपस्पृश्य ब्रह्मर्षिः प्रयतः शुचिः ।
तं देशमुपसंपेदे पाराशर्यो मनोजवः ॥ ११-१३-४ (६५१५६)
दिव्येन चक्षुषा ज्ञात्वा मनसाऽनुद्धतेन च ।
सर्वप्राणभृतां भावं सततं स तु बुध्यति ॥ ११-१३-५ (६५१५७)
स स्नुषामब्रवीत्काले कल्याणानि महातपाः ।
शापकालमवाक्षिप्य शमकालमुदीरयन् ॥ ११-१३-६ (६५१५८)
न कोपः पाण्डवे कार्यो गान्धारि शममाप्नुहि ।
रजो निगृह्यतां चैव शृणु चेदं वचो मम ॥ ११-१३-७ (६५१५९)
पुरोक्ता युद्धकाले त्वं पुत्रेण जयमिच्छता ।
जयमाशास्व मे मातर्युध्यमानस्य शत्रुभिः ॥ ११-१३-८ (६५१६०)
सा तथा याच्यमाना त्वं युद्धकाले जयैषिणा ।
उक्तवत्यसि कल्याणि यतो धर्मस्ततो जयः ॥ ११-१३-९ (६५१६१)
वाचाऽप्यतीते मा क्रोधे मनः कुरु यशस्विनि ।
स्मरामि भाषमाणां हि त्वामहं सत्यवादिनीम् ॥ ११-१३-१० (६५१६२)
विग्रहे तुमुले राज्ञां गत्वा परमसंशयम् ।
जितं पाण्डुसुतैर्युद्धे नूनं धर्मस्ततोऽधिकः ॥ ११-१३-११ (६५१६३)
क्षमाशीला पुरा भूत्वा साऽद्य न क्षमसे कथम् ।
अधर्मे जहि धर्मज्ञे यतो धर्मस्ततो जयः ॥ ११-१३-१२ (६५१६४)
सा त्वं धर्मं परिस्मृत्य वाचं चोक्तां मनस्विनी ।

कोपं संयच्छ गान्धारि पाण्डवेषु सुतेषु ते ॥ ११-१३-१३ (६५१६५)
गान्धार्युवाच । ११-१३-१४क्ष् (५३४३)
भगवन्नाभ्यसूयामि नैतानिच्छामि नश्यतः ।
पुत्रशोकेन तु बलान्मनो विह्वलतीव मे ॥ ११-१३-१४ (६५१६६)
यथैव कुन्त्या कौन्तेया रक्षितव्यास्तथा मया ।
तथैव धृतराष्ट्रेण रक्षितव्या यथा त्वया ॥ ११-१३-१५ (६५१६७)
दुःशासनापराधेन शकुनेः सौबलस्य च ।
कर्णदुर्योधनाभ्यां च कृतोऽयं कुरुसंक्षयः ॥ ११-१३-१६ (६५१६८)
नापराध्यति बीभत्सुर्न च पार्थो वृकोदरः ।
नकुलः सदेवश्च नैव राजा युधिष्ठिरः ॥ ११-१३-१७ (६५१६९)
युध्यमाना हि कौरव्याः कृतमामाः परस्परम् ।
निहताः सहिताश्चान्यैस्तत्र नास्त्यप्रियं मम ॥ ११-१३-१८ (६५१७०)
किं तु कर्माकरोद्भीमो वासुदेवस्य पश्यतः ।
दुर्योधनं समाहूय गदायुद्धे महामनाः ॥ ११-१३-१९ (६५१७१)
शिक्षयाऽभ्यधिकं ज्ञात्वा चरन्तं बहुधा रणे ।
अधो नाभ्याः प्रहृतवांस्तन्मे कोपमवर्धयत् ॥ ११-१३-२० (६५१७२)
कथं नु धर्मं धर्मज्ञाः समुद्दिष्टं महात्मभिः ।
त्यजेयुराहवे शूराः प्राणहेतोः कथञ्चनः ॥ ॥ ११-१३-२१ (६५१७३)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-१३-१० न चाप्यतीतां गान्धारि वाचं ते वितथामहम्
। स्मरामितोषमाणायास्तथा प्रणिहिता ह्यसि इति झ पाठे अस्य एनं दुर्योधनं तोषमाणाया आशीर्वचनेन तोषयन्त्यास्ते तव तां तां वाचं वितथां न स्मरामीत्यन्वयः ॥
११-१३-१३ सा त्वं धर्मं परित्यज्य वाचा चोक्त्वा मनस्विनि । इचि छ ट पाठः ॥
११-१३-१८ कृतमानाः कृताहकाराः ॥
११-१३-१३ त्रयोदशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१४
॥ श्रीः ॥
११.१४. अध्यायः १४

Mahabharata - Strii Parva - Chapter Topics
भीमगान्धारीसंवादः ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-१४-० (६५१७४)
वैशम्पायन उवाच। ११-१४-०क्ष् (५३४४)
तच्छ्रुत्वा वचनं तस्या भीमसेनोऽथ भीतवत् ।
गान्धारीं प्रत्युवाचेदं वचः सानुनयं तदा ॥ ११-१४-१ (६५१७५)
अधर्मो यदि वा धर्मस्त्रासात्तत्र मया कृतः ।
आत्मानं त्रातुकामेन तन्मे त्वं क्षन्तुमर्हसि ॥ ११-१४-२ (६५१७६)
न हि युद्धेन पुत्रस्ते धर्मेण स महाबलः ।
दुःशक्यः केनचिद्धर्तुमतो विषममाचरम् ॥ ११-१४-३ (६५१७७)
अधर्मेण जितः पूर्वं तेन चापि युधिष्ठिरः ।
निकृताश्च सदैव स्म ततो विषममाचरम् ॥ ११-१४-४ (६५१७८)
सैन्यस्यैकोऽवशिष्टोऽयं गदायुद्धे च वीर्यवान् ।
न त्यक्ष्यति हृतं राज्यमिति वै तत्कृतं मया ॥ ११-१४-५ (६५१७९)
एकपत्नीं च पाञ्चालीमेकवस्त्रां रजस्वलाम् ।
भवत्या विदितं सर्वमुक्तवान्यत्सुतस्तव ॥ ११-१४-६ (६५१८०)
सुयोधनं त्वसंहृत्य न शक्या भूः ससागरा ।
केवला भोक्तुमस्माभिरतश्चैतत्कृतं मया ॥ ११-१४-७ (६५१८१)
तच्चाप्यप्रियमस्माकं पुत्रस्ते समुपाचरत् ।
द्रौपद्या यत्सभामध्ये सव्यमूरुमदर्शयत् ॥ ११-१४-८ (६५१८२)
तत्रैव वध्यः सोऽस्माकं दुराचारोऽम्ब ते सुतः ।
धर्मराजाज्ञया चैव स्थिताः स्म समये पुरा ॥ ११-१४-९ (६५१८३)
वैरमुद्दीपितं राज्ञि पुत्रेण तव यन्महत् ।
क्लेशिताश्च वने नित्यं तत एतत्कृतं मया ॥ ११-१४-१० (६५१८४)
वैरस्यास्य गताः पारं हत्वा दुर्योधनं रणे ।
राज्यं युधिष्ठिरे प्राप्ते वयं च गतमन्यवः ॥ ११-१४-११ (६५१८५)
गान्धार्युवाच। ११-१४-१२क्ष् (५३४५)
न तस्यैवं वधस्तात यं प्रशंससि मे सुतम् ।
कृतवांश्चापि तत्सर्वं यदिदं भाषसे मयि ॥ ११-१४-१२ (६५१८६)
हताश्वे नकुले यत्तु वृषसेनेन भारत ।
अपिबः शोणितं सङ्ख्ये दुःशासनशरीरजम् ॥ ११-१४-१३ (६५१८७)
सद्भिर्विगर्हितं घोरमनार्यजनसेवितम् ।
क्रूरं कर्माकृथास्तस्मात्तदयुक्तं वृकोदर ॥ ११-१४-१४ (६५१८८)

भीम उवाच। ११-१४-१५क्ष् (५३४६)
हताश्वं नकुलं दृष्ट्वा वृषसेनेन संयुगे ।
शत्रूणां तु प्रहृष्टानां त्रासः सञ्जनितो मया ॥ ११-१४-१५ (६५१८९)
ग्स प्रतिज्ञामकरवं पिबाम्यसृगरेरिति'।
रुधिरं नातिचक्राम दन्तोष्ठादम्ब मा शुचः ॥ ११-१४-१६ (६५१९०)
श्अन्यस्यापि न पातव्यं रुधिरं किंपुनः स्वकम् ।
यथैवात्मा तथा भ्राता विशेषो नास्ति कश्चन ॥ ११-१४-१७ (६५१९१)
वैवस्तितो हि तद्वद यथावत्कुलनन्दिनि ।
मा कृथा हृदि तन्मातर्न तत्पीतं मयाऽनघे ॥ ११-१४-१८ (६५१९२)
केशपक्षपरामर्शे द्रौपद्या द्यूतकारिते ।
क्रोधाद्यदब्रवं चाहं तच्च मे हृदि वर्तते ॥ ११-१४-१९ (६५१९३)
क्षत्रधर्माच्च्युतो राज्ञि भवेयं शाश्वतीः समाः ।
प्रतिज्ञां तामनिस्तीर्य ततस्तत्कृतवानहम् ॥ ११-१४-२० (६५१९४)
अनिगृह्य पुरा पुत्रानस्मस्वनपकारिषु ।
न ममार्हसि कल्याणि दोषेण परिशङ्कितुम् ॥ ११-१४-२१ (६५१९५)
गान्धार्युवाच। ११-१४-२२क्ष् (५३४७)
वृद्धस्यास्य शतं पुत्रान्निघ्नंस्त्वमपराजितः ।
कस्मान्नाशेषयः कञ्चिद्येनाल्पमपराधितम् ॥ ११-१४-२२ (६५१९६)
सन्तानमावयोस्तात वृद्धयोर्हृतराज्ययोः ।
नाशेषयः कथं यष्टिमेकां वृद्धयुगस्य वै ॥ ११-१४-२३ (६५१९७)
शेषे ह्यवस्थिते तात पुत्राणामल्पकेऽपि च ।
मन्ददुःखं भवेदद्य यदि त्वं धर्ममाचरेः ॥ ॥ ११-१४-२४ (६५१९८)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-१४-६ उक्तवान् नहि ते पतयः सन्तीत्यादि । राजपुत्रीं च
पाञ्चलीमिति झ पाठः ॥
११-१४-१४ चतुर्दशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१५
॥ श्रीः ॥
११.१५. अध्यायः १५

Mahabharata - Strii Parva - Chapter Topics

युधिष्ठिरादिभिर्गान्धारीकुन्त्योरभिवादनम् ॥ १ ॥
सकुन्त्या गान्धार्या द्रौपदीसमाश्वासनम् ॥ २ ॥

Mahabharata - Strii Parva - Chapter Text

११-१५-० (६५१९९)
वैशम्पायन उवाच। ११-१५-०क्ष् (५३४८)
तमेवमुक्त्वा गान्धारी युधिष्ठिरमपृच्छत ।
क्व स राजेति सक्रोधा पुत्रपौत्रवधार्दिता ॥ ११-१५-१ (६५२००)
तामभ्यगच्छत्कौन्तेयो वेपमानः कृताञ्जलिः ।
युधिष्ठिरस्तु गान्धारीं मधुरं वाक्यमब्रवीत् ॥ ११-१५-२ (६५२०१)
पुत्रहन्ता नृशंसोऽहं तव देवि युधिष्ठिरः ।
शापार्हः पृथिवीनाशे हेतुभूतः शपस्व माम् ॥ ११-१५-३ (६५२०२)
नहि मे जीवितेनार्थो न राज्येन सुखेन वा ।
तादृशान्सुहृदो हत्वा प्रमूढस्य सुहृद्द्रुहः ॥ ११-१५-४ (६५२०३)
तमेवंवादिनं भीतं सन्निकर्षागतं तदा ।
नोवाच किञ्चिद्गान्धारी निःश्वासपरमा नृप ॥ ११-१५-५ (६५२०४)
तस्मावनतदेहस्य पादयोर्निपतिष्यतः ।
युधिष्ठिरस्य नृपतेर्धर्मज्ञा दीर्घदर्शिनी ॥ ११-१५-६ (६५२०५)
अङ्गुल्यग्राणि ददृशे देवी पट्टान्तरेण सा ।
ततः स कुनखीभूतो दर्शनीयनखो नृपः ॥ ११-१५-७ (६५२०६)
तं दृष्ट्वा चार्जुनोऽगच्छद्वासुदेवस्य पृष्ठतः ॥ ११-१५-८ (६५२०७)
एवं सञ्चेष्टमानांस्तानितश्चेतश्च भारत ।
गान्धारी विगतक्रोधा सांत्वयामास मातृवत् ॥ ११-१५-९ (६५२०८)
ते पाण्डवा अनुज्ञाता मातरं वीतमत्सराः ।
अभ्यगच्छन्त सहिताः पृथां पृथुवलक्षसः ॥ ११-१५-१० (६५२०९)
चिरस्य दृष्ट्वा पुत्रान्सा पुत्राधिभिरभिप्लुता ।
बाष्पमाहारयद्देवी वस्त्रेणावृत्य वै मुखम् ॥ ११-१५-११ (६५२१०)
ततो बाष्पं समुत्सृज्य सह पुत्रैस्तदा पृथा ।
अपश्यदेनाञ्शस्त्रौघैर्बहुधा परिविक्षतान् ॥ ११-१५-१२ (६५२११)
सा तानेकैकशः पुत्रान्संस्पृशन्ती पुनःपुनः ।
अन्वशोचत दुःखार्ता द्रौपदीं निहतात्मजाम् ।
रुदन्तीमथ पाञ्चालीं ददर्श पतितां भुवि ॥ ११-१५-१३ (६५२१२)
द्रौपद्युवाच। ११-१५-१४क्ष् (५३४९)
आर्ये पौत्रास्तु ते सर्वे सौभद्रसहिता गताः ।
न त्वां तेऽद्याभिगच्छन्ति चिरं दृष्ट्वा अनिन्दिते ।

किन्नु राज्येन मे कार्यं विहीनायाः सुतैर्वरैः ॥ ११-१५-१४ (६५२१३)
तां समाश्वासयामास पृथा पृथललोचना ।
उत्थाप्याङ्केन सुदतीं रुदतीं शोककर्शिताम् ॥ ११-१५-१५ (६५२१४)
तयैव सहिता चापि पुत्रैरनुगता पृथा ।
अभ्यगच्छत गान्धारीमार्तामार्ततरा स्वयम् ॥ ११-१५-१६ (६५२१५)
वैशम्पायन उवाच । ११-१५-१७क्ष् (५३५०)
तामुवाचाथ गान्धारी सह कुन्त्या यशस्विनीम् ।
मैवं पुत्रीति शोकार्ता पश्य मामपि दुःखितां ॥ ११-१५-१७ (६५२१६)
मन्ये लोकविनाशोऽयं कालपर्यायनोदितः ।
अवश्यभावी सम्प्राप्तः स्वभावाद्रोमहर्षणः ॥ ११-१५-१८ (६५२१७)
इदं तत्समनुप्राप्तं विदुरस्य वचो महत् ।
असिद्धानुनये कृष्णे यदुवाच महामतिः ॥ ११-१५-१९ (६५२१८)
तस्मिन्नपरिहार्येऽर्थे व्यतीते च विशेषतः ।
मा शुचो न हि शोच्यास्ते सङ्ग्रामे निधनं गताः ॥ ११-१५-२० (६५२१९)
यथैवाहं तथैव त्वं को वामाश्वासयिष्यति ।
ममैव ह्यपराधेन कुलमग्र्यं विनाशितम् ॥ ॥ ११-१५-२१ (६५२२०)

इति श्रीमन्महाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-१५-७ कुनखीभूतो हस्तदेश इति शेषः ॥
११-१५-१४ आर्ये पौत्रा हताः सर्वे इति क छ़ पाठः ॥
११-१५-२१ वां आवाम् ॥
११-१५-१५ पञ्चदशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१६
॥ श्रीः ॥
११.१६. अध्यायः १६

Mahabharata - Strii Parva - Chapter Topics
गान्धार्या व्यासप्रसादलब्धदिव्यचक्षुषा रणाङ्कणदर्शनम् ॥ १ ॥
धृतराष्ट्रयुधिष्ठिरादीनां स्त्रीभिः सह रणभूमिप्रवेशः ॥ २ ॥
स्त्रीणां विलापः ॥ ३ ॥
गान्धार्या कृष्णाय विलपत्स्नुषादिप्रदर्शनम् ॥ ४ ॥

११-१६-० (६५२२१)
वैशम्पायन उवाच। ११-१६-०क्ष् (५३५१)
एवमुक्त्वा तु गान्धारी कुरूणामवकर्तनम् ।
अपश्यत्तत्र तिष्ठन्ती सर्वं तत्र यथास्थितम् ॥ ११-१६-१ (६५२२२)
पतिव्रता महाभागा समानव्रतचारिणी ।
उग्रेण तपसा युक्ता सततं सत्यवादिनी ॥ ११-१६-२ (६५२२३)
वरदानेन कृष्णस्य महर्षेः पुण्यकर्मणः ।
दिव्यज्ञानबलोपेता विविधं पर्यदेवयत् ॥ ११-१६-३ (६५२२४)
ददर्श सा बुद्धिमती दूरादपि यथाऽन्तिके ।
रणाजिरं तद्वीराणामद्भुतं रोमहर्षणम् ॥ ११-१६-४ (६५२२५)
अस्थिकेशवसाकीर्णं शोणितौघपरिप्लुतम् ।
शरीरैर्बहुसाहस्रैर्विनिकीर्णं समन्ततः ॥ ११-१६-५ (६५२२६)
गजाश्वरथयोधानामावृतं रुधिराविलैः ।
शरीरैरशिरस्कैश्च विदेहैश्च शिरोगणैः ॥ ११-१६-६ (६५२२७)
गजाश्वनरवीराणां निःसत्वैरभिसंवृतम् ।
सृगालवलगोमायुकङ्ककाकनिषेवितम् ॥ ११-१६-७ (६५२२८)
रक्षसां पुरुषादाना मोदनं कुरराकुलम् ।
अशिवाभिः शिवाभिश्च नादितं गृध्रसेवितम् ॥ ११-१६-८ (६५२२९)
ततो व्यासाभ्यनुज्ञातो धृतराष्ट्रो महीपतिः ।
पाण्डुपुत्राश्च ते सर्वे युधिष्ठिरपुरोगमाः ॥ ११-१६-९ (६५२३०)
वासुदेवं पुरस्कृत्य हतबन्धुं च पार्थिवम् ।
कुरुस्त्रियः समादाय जग्मुरायोधनं प्रति ॥ ११-१६-१० (६५२३१)
समासाद्य कुरुक्षेत्रं ताः स्त्रियो निहतेश्वराः ।
अपश्यन्त हतांस्तत्र पुत्रान्भ्रातॄन्पितॄन्पतीन् ॥ ११-१६-११ (६५२३२)
क्रव्यादैर्भक्ष्यमाणांश्च गोमायुवलवायसैः ।
भूतैः पिशाचै रक्षोभिर्विविधैश्च निशाचरैः ॥ ११-१६-१२ (६५२३३)
रुद्राक्रीडनिभं दृष्ट्वा तदा विशसनं स्त्रियः ।
कुरर्य इव शोकार्ता विक्रोशन्त्यो निपेतिरे ॥ ११-१६-१३ (६५२३४)
अदृष्टपूर्वं पशन्त्यो दुःखार्ता भरतस्त्रियः ।
शरीरेषु स्खलन्त्यश्च न्यपतंश्च परासुवत् ॥ ११-१६-१४ (६५२३५)
श्रान्तानां चाप्यनाथानां क्रन्दन्तीनां भृशं तदा ।
पाञ्चालकुरुयोषाणां कृपणं तदभून्महत् ॥ ११-१६-१५ (६५२३६)
दुःखोपहतचित्ताभिः समन्तादनुनादितम् ।
दृष्ट्वाऽऽयोधनमत्युग्रं धर्मज्ञा सुबलात्मजा ॥ ११-१६-१६ (६५२३७)

ततः सा पुण्डरीकाक्षमामन्त्र्य पुरुषोत्तमम् ।
कुरूणां वैशमं दृष्ट्वा इदं वचनमब्रवीत् ॥ ११-१६-१७ (६५२३८)
पश्यैताः पुण्डरीकाक्ष स्नुषा मे निहतेश्वराः ।
प्रकीर्णकेशाः क्रोशन्तीः कुररीरिव माधव ॥ ११-१६-१८ (६५२३९)
अमूस्त्वभिसमागम्य स्मरन्त्यो भरतर्षभान् ।
पृथगेवानुपद्यन्ते पुत्रान्भ्रातॄन्पितॄन्पतीन् ॥ ११-१६-१९ (६५२४०)
वीरसूभिर्महाबाहो हतपुत्राभिरावृतम् ।
क्वचिच्च वीरपत्नीभिर्हतवीराभिरावृतम् ॥ ११-१६-२० (६५२४१)
शोभितं पुरुषव्याघ्रैः कर्णभीष्माभिमन्युभिः ।
द्रोणद्रुपदशल्यैश्च ज्वलद्भिरिव पावकैः ॥ ११-१६-२१ (६५२४२)
काञ्चनैः कवचैर्निष्कैर्मणिभिश्च महाधनैः ।
अङ्गदैर्हस्तकेयूरैः स्रग्भिश्च समलंकृतम् ॥ ११-१६-२२ (६५२४३)
वीरबाहुविसृष्टाभिः शक्तिभिः परिघैरपि ।
खड्गैश्च विविधैस्तीक्ष्णैः सशरैश्च शरासनैः ॥ ११-१६-२३ (६५२४४)
क्रव्यादसङ्घैर्मुदितैस्तिष्ठद्भिः सहितैः क्वचित् ।
क्वचिदाक्रीडमानैश्च शयानैश्चापरैः क्वचित् ॥ ११-१६-२४ (६५२४५)
एतदेवंविधं वीर सम्पश्यायोधनं विभो ।
ग्त्वया तु श्रावितं कर्म पुष्कराक्ष महाद्युते'।
पश्यमाना हि दह्यामि शोकेनाहं जनार्दन ॥ ११-१६-२५ (६५२४६)
पाञ्चालानां कुरूणां च विनाशं मधुसूदन ।
पञ्चानामपि भूतानामहं वधमचिन्तयम् ॥ ११-१६-२६ (६५२४७)
तान्सुपर्णाश्च गृध्राश्च कर्षयन्त्यसृगुक्षितान् ।
विगृह्य चरणैर्गृध्रा भक्षयन्ति सहस्रशः ॥ ११-१६-२७ (६५२४८)
जयद्रथस्य कर्णस्य तथैव द्रोमभीष्मयोः ।
अभिमन्योर्विनाशं च कश्चिन्तयितुमर्हति ॥ ११-१६-२८ (६५२४९)
अवध्यकल्पान्निहतान्गतसत्वानचेतसः ।
गृध्रकङ्कवलश्येनश्वसृगालसमावृतान् ॥ ११-१६-२९ (६५२५०)
अमर्षवशमापन्नान्दुर्योधनवशे स्थितान् ।
पश्येमान्पुरुषव्याघ्रान्संशान्तान्पावकानिव ॥ ११-१६-३० (६५२५१)
शयनान्युचिताः सर्वे मृदूनि विमलानि च ।
विपन्नास्तेऽद्य वसुधां विवृतामधिशेरते ॥ ११-१६-३१ (६५२५२)
बन्दिभिः सततं काले स्तुवद्भिरभिनन्दिताः ।
शिवानामशिवा घोराः शृण्वन्ति विविधा गिरः ॥ ११-१६-३२ (६५२५३)
ये पुरा शेरते वीराः शयनेषु यशस्विनः ।
चन्दनागुरुदिग्धाङ्गास्तेऽद्य पांसुषु शेरते ॥ ११-१६-३३ (६५२५४)
तेषामाभरणान्येते गृध्रगोमायुवायसाः ।

आक्षिपन्ति शिवा घोरा विनदन्त्यः पुनः पुनः ॥ ११-१६-३४ (६५२५५)
बाणान्वनिनिशितान्पीतान्निस्त्रिंशान्विमला गदाः ।
युद्धाभिमानिनः सर्वे जीवन्त इव बिभ्रति ॥ ११-१६-३५ (६५२५६)
सुरूपवर्णा बहवः क्रव्यादैरवघट्टिताः ।
ऋषभप्रतिरूपाक्षाः शेरते च सहस्रशः ॥ ११-१६-३६ (६५२५७)
अपरे पुनरालिङ्ग्य गदाः परिघबाहवः ।
शेरतेऽभिमुखाः शूरा दयिता इव योषितः ॥ ११-१६-३७ (६५२५८)
बिभ्रतः कवचान्यन्ये विमलान्यायुधानि च ।
न धर्षयन्ति क्रव्यादा जीवन्तीति जनार्दन ॥ ११-१६-३८ (६५२५९)
क्रव्यादैः कृष्यमाणानामपरेषां महात्मनाम् ।
शातकौम्भ्यः स्रजश्चित्रा विप्रकीर्णाः समन्ततः ॥ ११-१६-३९ (६५२६०)
एते गोमायवो भीमा निहतानां यशस्विनाम् ।
कण्ठान्तरगतान्हारानाक्षिपन्ति सहस्रशः ॥ ११-१६-४० (६५२६१)
सर्वेष्वपररात्रेषु यानवन्दन्त बन्दिनः ।
स्तुतिभिश्च परार्ध्याभिरुपचारैश्च शिक्षिताः ॥ ११-१६-४१ (६५२६२)
तानद्य परिदेवन्ति दुःखार्ता परमाङ्गनाः ।
कृपणा वृष्णिशार्दूल दुःखशोकार्दिता भृशम् ॥ ११-१६-४२ (६५२६३)
रक्तोत्पलवनानीव विभान्ति रुचिराणि च ।
मुखानि परमस्त्रीणां परिशुष्काणि केशव ॥ ११-१६-४३ (६५२६४)
रुदित्वा विरता ह्येता ध्यायन्त्यः सपरिक्लमाः ।
कुरुस्त्रियोऽभिगच्छन्ति तेन तेनैव दुःखिताः ॥ ११-१६-४४ (६५२६५)
एतान्यादित्यवर्णानि तपमीयनिभानि च ।
पश्य रोदनताम्राणि वक्त्राणि कुरुयोषिताम् ॥ ११-१६-४५ (६५२६६)
श्यामानां वरवर्णानां गौरीणामेकवाससाम् ।
दुर्योधनवरस्त्रीणां पश्य वृन्दानि केशव ॥ ११-१६-४६ (६५२६७)
आसामपरिपूर्णार्थं निशम्य परिदेवितम् ।
इतरेरसङ्क्रन्दान्न विजानन्ति योषितः ॥ ११-१६-४७ (६५२६८)
एता दीर्घमिवोच्छ्वस्य विक्रुश्य च विलप्य च ।
विस्पन्दमाना दुःखेन वीरा जहति जीवितम् ॥ ११-१६-४८ (६५२६९)
बह्व्यो दृष्ट्व शरीराणि क्रोशन्ति विलपन्ति च ।
पाणिभिश्चापरा घ्नन्ति शिरांसि मृदुपाणयः ॥ ११-१६-४९ (६५२७०)
शिरोभिः पतितैर्हस्तैः सर्वाङ्गैः खण्डशः कृतैः ।
इतरेतसम्पृक्तैराकीर्णा भाति मेदिनी ॥ ११-१६-५० (६५२७१)
विशिरस्कानथो कायान्दृष्ट्वा ह्येताननिन्दितान् ।
मुह्यन्त्यनुचिता नार्यो विदेहानि शिरांसि च ॥ ११-१६-५१ (६५२७२)
शिरः कायेन सन्धाय प्रेक्षमाणा विचेतसः ।

अपश्यन्त्योऽपरं तत्र नेदमस्त्येऽति दुःखिताः ॥ ११-१६-५२ (६५२७३)
बाहूरुचरणानन्यान्विशिखोन्मथितान्पृथक् ।
सन्दधत्योऽसुखाविष्टा मूर्छन्त्येताः पुनःपुनः ॥ ११-१६-५३ (६५२७४)
उत्कृत्तशिरसश्चान्यान्विजग्धान्मृगपक्षिभिः ।
दृष्ट्वा काश्चिन्न जानन्ति भर्तॄन्भरतयोषितः ॥ ११-१६-५४ (६५२७५)
पाणिभिश्चापरा घ्नन्ति शिरांसि मधुसूदन ।
प्रेक्ष्य भ्रातॄन्पितॄन्पुत्रान्पतींश्च निहतान्परैः ॥ ११-१६-५५ (६५२७६)
बाहुभिश्च सखड्गैश्च शिरोभिश्च सकुण्डलैः ।
अगम्यकल्पा पृथिवी मांसशोणितकर्दमा ।
बभूव भरतश्रेष्ठ प्राणिभिर्गतजीवितैः ॥ ११-१६-५६ (६५२७७)
न दुःखेषूचिताः पूर्वं दुःखं गाहन्त्यनिन्दिताः ।
भ्रातृभिः पतिभिः पुत्रैरुपाकीर्णां वसुन्धराम् ॥ ११-१६-५७ (६५२७८)
यूथानीव किशोरीणां सुकेशीनां जनार्दन ।
स्नुषाणां धृतराष्ट्रस्य पश्य वृन्दान्यनेकशः ॥ ११-१६-५८ (६५२७९)
इतो दुःखतरं किन्नु केशव प्रतिभाति मे ।
यदिमाः कुर्वते सर्वा रवमुच्चावचं स्त्रियः ॥ ११-१६-५९ (६५२८०)
नूनमाचरितं पापं मया पूर्वेषु जन्मसु ।
या पश्यामि हतान्पुत्रान्पौत्रान्भ्रातृंश्च माधव ॥ ११-१६-६० (६५२८१)
एवमार्ता विलपती समाभाष्य जनार्दनम् ।
गान्धारी पुत्रशोकार्ता ददर्श निहतं सुतम् ॥ ॥ ११-१६-६१ (६५२८२)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि षोडशोऽध्यायः ॥ १६ ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-१६-१ अवकर्तनं युद्धस्थानम् । सर्वं दिव्येन चक्षुषेति झ पाठः ॥
११-१६-२६ पञ्चानां भूतानां पृथिव्यादीनाम्
। कुरुपाञ्चालवधात्कृत्स्नं पाञ्चभौतिकं जगन्नष्टमिति भावः ॥
११-१६-३१ xxxxxx येति शेषः ॥
११-१६-४८ एताः शोचन्तीरभिलक्ष्येति शेषः ॥
११-१६-५४ विजग्धान्भक्षितान् ॥
११-१६-१६ षोडशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१७
॥ श्रीः ॥
११.१७. अध्यायः १७

Mahabharata - Strii Parva - Chapter Topics
गान्धार्या दुर्योधनमालिङ्ग्य परिदेवनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-१७-० (६५२८३)
वैशम्पायन उवाच। ११-१७-०क्ष् (५३५२)
दुर्योधनं हतं दृष्ट्वा गान्धारी शोककर्शिता ।
सहसा न्यपतद्भूमौ छिन्नेव कदली वने ॥ ११-१७-१ (६५२८४)
सा तु लब्ध्वा पुनः संज्ञां विक्रुश्य च विलप्य च ।
दुर्योधनमभिप्रेक्ष्य शयानं रुधिरोक्षितम् ॥ ११-१७-२ (६५२८५)
परिष्वज्याथ गान्धारी कृपणं पर्यदेवयत् ।
हाहापुत्रेति शोकार्ता विललापाकुलेन्द्रिया ॥ ११-१७-३ (६५२८६)
सुगूढजत्रु विपुलं हारनिष्कविभूषितम् ।
वारिणा नेत्रजेनोरः सिञ्चन्ती शोकतापिता ॥ ११-१७-४ (६५२८७)
समीपस्थं हृषीकेशमिद वचनमब्रवीत् ।
उपस्थितेऽस्मिन्सङ्ग्रामे ज्ञातीनां संक्षये विभो ॥ ११-१७-५ (६५२८८)
मामयं प्राह वार्ष्णेय प्राञ्चलिर्नृपसत्तमः ।
अस्मिञ्ज्ञातिसमुद्धर्षे जयमम्बा ब्रवीतु मे ॥ ११-१७-६ (६५२८९)
इत्युक्ते जानती सर्वमहं स्वव्यसनागमम् ।
अब्रुवं पुरुषव्याघ्र यतो धर्मस्ततो जयः ॥ ११-१७-७ (६५२९०)
तथा तु युव्यमानस्त्वं सम्प्रगृह्य सुपुत्रक ।
ध्रुवं शस्त्रजिताँल्लोकान्प्राप्स्यस्यमरवत्प्रभो ॥ ११-१७-८ (६५२९१)
इत्येवxxx पूर्वं नैवं शोचामि वै प्रभो ।
धृतराष्ट्रं तु शोचामि कृपणं हतबान्धवम् ॥ ११-१७-९ (६५२९२)
अमर्वणं युधां श्रेष्ठं कृतास्त्रं युद्धदुर्मदम् ।
शयानं वीरशयने पश्य माधव मे सुतम् ॥ ११-१७-१० (६५२९३)
बोऽयं मूर्धावसिक्तानाये याति परन्तपः ।
सोऽवं पांसुषु शेतेऽद्य पञ्च कालस्य पर्ययम् ॥ ११-१७-११ (६५२९४)
दुवं दुर्योधनो वीरो गतिं न सुलभां गतः ।
तथा ह्यभिxxxx शेते शयने वीरसेविते ॥ ११-१७-१२ (६५२९५)
यं पुरा पर्युपासीना समयन्ति वरस्त्रियः ।
सं वीरशयने सुप्तं रमयन्त्यशिवाः शिवाः ॥ ११-१७-१३ (६५२९६)
यं पुरा पर्युपासीना रमयन्ति महीक्षितः ।
महीतलस्यं निहतं गृध्रास्तं पर्युपासते ॥ ११-१७-१४ (६५२९७)
यं पुरा व्यजनैरम्यैरुपवीजन्ति योषितः ।

तमद्य पक्षव्यजनै रुपवीजन्ति पक्षिणः ॥ ११-१७-१५ (६५२९८)
एष शेते महाबाहुर्बलवान्सत्यविक्रमः ।
सिंहेनेव द्विपः सङ्ख्ये भीमसेनेन पातितः ॥ ११-१७-१६ (६५२९९)
पश्य दुर्योधनं कृष्ण शयानं रुधिरोक्षितम् ।
निहतं भीमसेनेन गदां सम्मृज्य भारत ॥ ११-१७-१७ (६५३००)
अक्षौहिणीर्महाबाहुर्दश चैकां च केशव ।
आनयद्यः पुरा सङ्ख्ये सोऽनयान्निधनं गतः ॥ ११-१७-१८ (६५३०१)
एष दुर्योधनः शेते महेष्वासो महाबलः ।
शार्दूल इव सिंहेन भीमसेनेन पातितः ॥ ११-१७-१९ (६५३०२)
विदुरं ह्यवमत्यैष पितरं चैव मन्दभाक् ।
बालो वृद्धावमानेन मन्दो मृत्युवशं गतः ॥ ११-१७-२० (६५३०३)
निःसपत्ना मही यस्य त्रयोदशसमाः स्थिता ।
स शेते निहतो भूमौ पुत्रो मे पृथिवीपतिः ॥ ११-१७-२१ (६५३०४)
अपश्यं कृष्ण पृथिवीं धार्तराष्ट्रानुशासिताम् ।
पूर्णां हस्तिगवाश्वैश्च वार्ष्णेय न तु तच्चिरम् ॥ ११-१७-२२ (६५३०५)
तामेवाद्य महाबाहो पश्याम्यन्यानुशासिताम् ।
हीनां हस्तिगवाश्वेन किन्नु जीवामि माधव ॥ ११-१७-२३ (६५३०६)
इदं कष्टतरं पश्य पुत्रस्यापि वधान्मम ।
या इमाः पर्युपासन्ते हताञ्शूरान्रणे स्त्रियः ॥ ११-१७-२४ (६५३०७)
प्रकीर्णकेशां सुश्रोणीं दुर्योधनभूजाङ्कगाम् ।
रुक्मवेदिनिभां पश्य कृष्ण लक्ष्मणमातरम् ॥ ११-१७-२५ (६५३०८)
नूनमेषा पुरा बाला जीवमाने महाभुजे ।
भुजावाश्रित्य रमते सुभुजस्य मनस्विनी ॥ ११-१७-२६ (६५३०९)
कथं तु शतधा नेदं हृदयं मम दीर्यते ।
पश्यन्त्या निहतं पुत्रं पौत्रेण सहितं रणे ॥ ११-१७-२७ (६५३१०)
पुत्रं रुधिरसंसिक्तमुपजिघ्रत्यनिन्दिता ।
दुर्योधनं तु वामोरूः पाणिना परिमार्जती ॥ ११-१७-२८ (६५३११)
किन्नु शोचति भर्तारं हतपुत्रं मनस्विनी ।
तथा ह्यवस्थिता भाति पुत्रं चाप्यभिवीक्ष्य सा ॥ ११-१७-२९ (६५३१२)
स्वशिरः पञ्चशाखाभ्यामभिहत्यायतेक्षणा ।
पतत्युरसि वीरस्य कुरुराजस्य माधव ॥ ११-१७-३० (६५३१३)
पुण्डरीकनिभा भाति पुण्डरीकान्तरप्रभा ।
मुखं प्रमृज्य पुत्रस्य भर्तुश्चैव तपस्विनी ॥ ११-१७-३१ (६५३१४)
यदि सत्यागमाः सन्ति यदि वै श्रुतयस्तथा ।
ध्रुवं लोकानवाप्तोऽयं नृपो बाहुबलार्जितान् ॥ ॥ ११-१७-३२ (६५३१५)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि सप्तदशोऽध्यायः
॥ १७ ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-१७-२७ पुत्रेण सहितं रणे इति झ पाठः ॥
११-१७-३० पञ्चशाखाभ्यां पञ्चाङ्गुलिभ्यां पाणिभ्याम् ॥
११-१७-१७ सप्तदशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१८
॥ श्रीः ॥
११.१८. अध्यायः १८

Mahabharata - Strii Parva - Chapter Topics
कृष्णम्प्रति गान्धारीवचनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-१८-० (६५३१६)
गान्धार्युवाच। ११-१८-०क्ष् (५३५३)
पश्य माधव पुत्रान्मे शतसङ्ख्याञ्जितक्लमान् ।
गदया भीमसेनेन भूयिष्ठं निहतान्रणे ॥ ११-१८-१ (६५३१७)
इदं दुःखतरं मेऽद्य यदिमा मुक्तमूर्धजाः ।
हतपुत्रा रणे बालाः परिधावन्ति मे स्नुषाः ॥ ११-१८-२ (६५३१८)
प्रासादतलचारिण्यश्चरमैर्भूषणान्वितैः ।
कायेनाद्य स्पृशन्तीमां रुधिरार्द्रां वसुन्धराम् ॥ ११-१८-३ (६५३१९)
कृच्छ्रादुत्सारयन्ति स्म गृध्रगोमायुवायसान् ।
दुःखेनार्ता विघूर्णन्त्यो मत्ता इव चरन्त्युत ॥ ११-१८-४ (६५३२०)
एषाऽन्या त्वनवद्याङ्गी करसम्मितमध्यमा ।
घोरमायोधनं दृष्ट्वा निपतत्यतिदुःखिता ॥ ११-१८-५ (६५३२१)
दृष्ट्वा मे पार्थिवसुतामेतां लक्ष्मणमातरम् ।
राजपुत्रीं महाबाहो मनो न ह्युपशाम्यति ॥ ११-१८-६ (६५३२२)
भ्रातॄंश्चान्याः पितॄंश्चान्याः पुत्रांश्च निहतान्भुवि ।
दृष्ट्वा परिपतन्त्येषाः प्रगृह्य सुमहाभुजान् ॥ ११-१८-७ (६५३२३)
मध्यमानां तु नारीणां वृद्धानां चापराजित ।
आक्रन्दं हतबन्धूना दारुणे वैशसे शृणु ॥ ११-१८-८ (६५३२४)
रथनीडानि देहांश्च हतानां गजवाजिनाम् ।

आश्रित्य श्रममोहार्ताः स्थिताः पश्य महाभुज ॥ ११-१८-९ (६५३२५)
अन्या चापहृतं कायाच्चारुकुण्डलमुन्नसम् ।
स्वस्य बन्धोः शिरः कृष्ण गृहीत्वा पश्य तिष्ठति ॥ ११-१८-१० (६५३२६)
पूर्वजातिकृतं पापं मन्ये नाल्पमिवानघ ।
एताभिर्निरवद्याभिर्मया चैवाल्पपुण्यया ।
यदिदं धर्मराजेन घातितं नो जनार्दन ॥ ११-१८-११ (६५३२७)
न हि नाशोऽस्ति वार्ष्णेय कर्मणोः शुभपापयोः ॥ ११-१८-१२ (६५३२८)
प्रत्यग्रवयसः पश्य दर्शनीयकुचाननाः ।
कुलेषु जाता ह्रीमत्यः कृष्णपक्ष्माक्षिमूर्धजाः ॥ ११-१८-१३ (६५३२९)
हंसगद्गदभाषिण्यो दुःखशोकप्रमोहिताः ।
सारस्य इव वाशन्त्यः पतिताः पश्य माधव ॥ ११-१८-१४ (६५३३०)
फुल्लपद्मप्रकाशानि पुण्डरीकाक्ष योषिताम् ।
अनवद्यानि वक्त्राणि तापयत्येष रश्मिवान् ॥ ११-१८-१५ (६५३३१)
सेर्ष्याणां मम पुत्राणां वासुदेवावरोधनम् ।
मत्तमातङ्गदर्पाणां पश्यन्त्यद्य पृथग्जनाः ॥ ११-१८-१६ (६५३३२)
शतचन्द्राणि चर्माणि ध्वजांश्चादित्यवर्चसः ।
रौक्माणि चैव वर्माणि निष्कानपि च काञ्चनान् ॥ ११-१८-१७ (६५३३३)
शिरस्त्राणानि चैतानि पुत्राणां मे महीतले ।
पश्य दीप्तानि गोविन्द पावकान्सुहुतानिव ॥ ११-१८-१८ (६५३३४)
एष दुःशासनः शेते शूरेणामित्रघातिना ।
पीतशोणिक्ष्क्ष् सर्वाङ्गो युधि भीमेन पातितः ॥ ११-१८-१९ (६५३३५)
गदया भीमसेनेन पश्य माधव मे सुतम् ।
द्यूतक्लेशाननुस्मृत्य द्रौपदीचोदितेन च ॥ ११-१८-२० (६५३३६)
उक्ता ह्यनेन पाञ्चाली सभायां द्यूतनिर्जिता ।
प्रियं चिकीर्षता भ्रातुः कर्णस्य च जनार्दन ॥ ११-१८-२१ (६५३३७)
सहैव सहदेवेन नकुलेनार्जुनेन च ।
दासीभूताऽसि पाञ्चालि क्षिप्रं प्रविश नो गृहान् ॥ ११-१८-२२ (६५३३८)
ततोऽहमब्रुवं कृष्ण तदा दुर्योधनं नृपम् ।
मृत्युपाशपरिक्षिप्तां द्रौपदीं पुत्र वर्जय ॥ ११-१८-२३ (६५३३९)
निबोधैनं सुदुर्बुद्धिं मातुलं कलहप्रियम् ।
क्षिप्रमेनं परित्यज्य पुत्र संशाम्य पाण्डवैः ॥ ११-१८-२४ (६५३४०)
न बुद्ध्यसे त्वं दुर्बुद्धे भीमसेनममर्षणम् ।
वाङ्नाराचैस्तुदंस्तीक्ष्णैरुल्काभिरिव कुञ्जरम् ॥ ११-१८-२५ (६५३४१)
तानेवं रहसि क्रुद्धो वाक्शल्यानवधारयन् ।
उत्ससर्ज विषं तेषु सर्पो गोवृषभेष्विव ॥ ११-१८-२६ (६५३४२)
एष दुःशासनः शेते विक्षिप्य विपुलौ भुजौ ।

निहतो भीमसेनेन सिहेनेव महागजः ॥ ११-१८-२७ (६५३४३)
अत्यर्थमकरोद्रौद्रं भीमसेनोऽत्यमर्षणः ।
दुःशासनस्य यत्क्रुद्धोऽपिबच्छोणितमाहवे ॥ ॥ ११-१८-२८ (६५३४४)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि अष्टादशोऽध्यायः
॥ १८ ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-१८-५ करसम्मितमध्यमा मुष्टिप्रमितमध्या ॥
११-१८-२३ क्षिप्तं शकुनिं पुत्र वजेयेति झ पाठः ॥
११-१८-१८ अष्टादशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०१९
॥ श्रीः ॥
११.१९. अध्यायः १९

Mahabharata - Strii Parva - Chapter Topics
कृष्णम्प्रति गान्धारीवचनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-१९-० (६५३४५)
गान्धार्युवाच। ११-१९-०क्ष् (५३५४)
एष माधव पुत्रो मे विकर्णः पाज्ञसम्मतः ।
भूमौ विनिहतः शेते भीमेन शतधा कृतः ॥ ११-१९-१ (६५३४६)
गजमध्ये हतः शेते विकर्णो मधुसूदन ।
नीलमेघपरिक्षिप्तः शरदीव निशाकरः ॥ ११-१९-२ (६५३४७)
अस्य चापग्रहेणैव पाणिः कृतकिणो महान् ।
कथञ्चिच्छिद्यते गृध्रैरत्तुकामैस्तलत्रवान् ॥ ११-१९-३ (६५३४८)
अस्य भार्याऽऽमिषप्रेप्सून्गृध्रकाकांस्तपस्विनी ।
वारयत्यनिशं बाला न च शक्नोति माधव ॥ ११-१९-४ (६५३४९)
युवा वृन्दारकसमो विकर्णः पुरुषर्षभ ।
सुखोषितः सुखार्हश्च शेते पांसुषु माधव ॥ ११-१९-५ (६५३५०)
कर्णिनालीकनाराचैर्भिन्नमर्माणमाहवे ।
अद्यापि न जहात्येनं लक्ष्मीर्भरतसत्तमम् ॥ ११-१९-६ (६५३५१)
एष सङ्ग्रामशूरणे प्रतिज्ञां पालयिष्यता ।

दुर्मुखोऽभिमुखः शेते हतोऽरिगणहा रणे ॥ ११-१९-७ (६५३५२)
तस्यैतद्वदनं कृष्ण श्वापदैरर्धभक्षितम् ।
विभात्यभ्यधिकं तात सप्तम्यामिव चन्द्रमाः ॥ ११-१९-८ (६५३५३)
शूरस्य हि रणे कृष्ण पश्याननमथेदृशम् ।
स कथं निहतोऽमित्रैः पांसून्ग्रसति मे सुतः ॥ ११-१९-९ (६५३५४)
यस्याहवमुखे सौम्य स्थाता नैवोपपद्यते ।
स कथं दुर्मुखोऽमित्रैर्हतो विबुधलोकजित् ॥ ११-१९-१० (६५३५५)
चित्रसेनं हतं भूमौ शयानं मधुसूदन ।
धार्तराष्ट्रमिमं पश्य प्रतिमानं धनुष्मताम् ॥ ११-१९-११ (६५३५६)
तं चित्रमाल्याभरणं युवत्यः शोककर्शिताः ।
क्रव्यादसङ्घैः सहिता रुदन्त्यः पर्युपासते ॥ ११-१९-१२ (६५३५७)
स्त्रीणां रुदितनिर्घोषः श्वापदानां च गर्जितम् ।
चित्ररूपमिदं कृष्ण विमृश्य प्रतिभाति मे ॥ ११-१९-१३ (६५३५८)
युवा वृन्दारको नित्यं प्रवरस्त्रीनिषेवितः ।
विविंशतिरसौ शेते ध्वस्तः पांसुषु माधव ॥ ११-१९-१४ (६५३५९)
शरसङ्कृत्तवर्माणं वीरं विशसने हतम् ।
परिवार्यासते गृध्राः परिविंशं विविंशतिम् ॥ ११-१९-१५ (६५३६०)
प्रविश्य समरे शूरः पाण्डवानामनीकिनीम् ।
स वीरशयने शेते परः सत्पुरुषोचिते ॥ ११-१९-१६ (६५३६१)
स्मितोपपन्नं सुनसं सुभ्रु ताराधिपोपमम् ।
अतीव सौम्यवदनं कृष्ण पश्य विविंशतेः ॥ ११-१९-१७ (६५३६२)
यं स्म तं पर्युपासन्ते बहुधा वरयोषितः ।
क्रीडन्तमिव गन्धर्वं देवकन्याः सहस्रशः ॥ ११-१९-१८ (६५३६३)
हन्तारं परसैन्यानां शूरं समितिशोभनम् ।
निबर्हणममित्राणां दुःसहं विषहेत कः ॥ ११-१९-१९ (६५३६४)
दुःसहस्यैतदाभाति शरीरं संवृतं शरैः ।
गिरिरात्मरुहैः फुल्लैः कर्णिकारैरिवाचितः ॥ ११-१९-२० (६५३६५)
शातकौम्भ्या स्रजा भाति कवचेन च भास्वता ।
अग्निनेव गिरिः श्वेतो गतासुरपि दुःसहः ॥ ॥ ११-१९-२१ (६५३६६)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि एकोनविंशोऽध्यायः
॥ १९ ॥

स्त्रीपर्व - अध्याय ०२०
॥ श्रीः ॥
११.२०. अध्यायः २०

Mahabharata - Strii Parva - Chapter Topics
कृष्णंप्रति गान्धार्या रुदन्तीनां स्त्रीणां प्रदर्शनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-२०-० (६५३६७)
गान्धार्युवाच। ११-२०-०क्ष् (५३५५)
अध्यर्धगुणमाहुर्यं बले शौर्ये च केशव ।
पित्रा त्वया च दाशार्ह दृप्तं सिंहमिवोत्कटम् ॥ ११-२०-१ (६५३६८)
यो बिभेद चमूमेको मम पुत्रस्य दुर्भिदाम् ।
स भूत्वा मृत्युरन्येषां स्वयं मृत्युवशं गतः ॥ ११-२०-२ (६५३६९)
तस्योपलक्षये कृष्ण कार्ष्णेरमिततेजसः ।
अभिमन्योर्हतस्यापि प्रभा नैवोपशाम्यति ॥ ११-२०-३ (६५३७०)
एषा विराटदुहिता स्नुषा गाण्डीवधन्वनः ।
हतं बाला पतिं वीरं दृष्ट्वा शोचत्यनिन्दिता ॥ ११-२०-४ (६५३७१)
तमेषा हि समागम्य भार्या भर्तारमन्तिके ।
विराटदुहिता कृष्ण पाणिना परिमार्जति ॥ ११-२०-५ (६५३७२)
तस्य वक्त्रमुपाघ्राय सौभद्रस्य मनस्विनी ।
विबुद्धकमलाकारं कम्बुवृत्तशिरोधरम् ॥ ११-२०-६ (६५३७३)
कामरूपवती चैषा परिष्वजति भामिनी ।
लज्जमाना पुरा चैनं माध्वीकमदमूर्च्छिता ॥ ११-२०-७ (६५३७४)
तस्य क्षतजसन्दिग्धं जातरूपपरिष्कृतम् ।
विमुच्य कवचं कृष्ण शीरमभिवीक्षते ॥ ११-२०-८ (६५३७५)
अवेक्षमाणा तं बाला कृष्ण त्वामभिभाषते ।
अयं ते पुण्डरीकाक्ष कसदृशाक्षो निपातितः ॥ ११-२०-९ (६५३७६)
बले वीर्ये च सदृशस्तेजसा चैव तेऽनघ ।
रूपेण च तथाऽत्यर्थं शेते भुवि निपातितः ॥ ११-२०-१० (६५३७७)
अत्यन्तं सुकुमारस्य राङ्कवाजिनशायिनः ।
कच्चिदद्य शरीरं ते भूमौ न परितप्यते ॥ ११-२०-११ (६५३७८)
मातङ्गभुजवर्ष्माणौ ज्याक्षेपकठिनत्वचौ ।
काञ्चनाङ्गदिनौ शेते निक्षिप्य विपुलौ भुजौ ।
व्यायम्य बहुधा नूनं सुखसुप्तः श्रमादिव ॥ ११-२०-१२ (६५३७९)
एवं विलपतीमार्तां किं मां न प्रतिभाषसे ।
न स्मराम्यपराधं ते किं मां न प्रतिभाषसे ॥ ११-२०-१३ (६५३८०)
ननु मां त्वं पुरा दूरादभिवीक्ष्याभिभाषसे ।

न स्मराम्यपराधं मे किं मां न प्रतिभाषसे ॥ ११-२०-१४ (६५३८१)
आर्यामार्य सुभद्रां तवमिमां श्च त्रिदशोपमान् ।
पितॄन्मां चैव दुःखार्तां विहाय क्व गमिष्यसि ॥ ११-२०-१५ (६५३८२)
तस्य शोणितदिग्धान्वै केशानुन्नम्य पाणिना ।
उत्सङ्गे वक्तमाधाय जीवन्तमिव पृच्छति ॥ ११-२०-१६ (६५३८३)
स्वस्रीयं वासुदेवस्य पुत्रं गाण्डीवधन्वनः ।
कथं त्वां रणमध्यस्थं जघ्नुरेते महारथाः ॥ ११-२०-१७ (६५३८४)
धिगस्तु क्रूरकर्तॄंस्तान्कृपकर्णजयद्रथान् ।
द्रोणद्रौणायतनी चोभौ यैरहं विधवा कृता ॥ ११-२०-१८ (६५३८५)
रथर्षभाणां सर्वेषां कथमासीत्तदा मनः ।
बालं त्वां पिरवार्यैकमनेकेषां च जघ्नताम् ॥ ११-२०-१९ (६५३८६)
कथं नु पाण्डवानां च पाञ्चालानां तु पश्यताम् ।
त्वं वीर निधनं प्राप्तो नाथवान्सन्ननाथवत् ॥ ११-२०-२० (६५३८७)
दृष्ट्वा बहुभिराक्रन्दे निहतं त्वां पिता तव ।
वीरः पुरुषशार्दूलः कथं जीवति पाण्डवः ॥ ११-२०-२१ (६५३८८)
न राज्यलाभो विपुलः शत्रूणां च पराभवः ।
प्रीतिं धास्यति पार्थानां त्वामृते पुष्करेक्षण ॥ ११-२०-२२ (६५३८९)
तव शस्त्रजिताँल्लोकान्धर्मेण च दमेन च ।
क्षिप्रमन्वागमिष्यामि तत्र मां प्रतिपालय ॥ ११-२०-२३ (६५३९०)
दुर्मरं पुनरप्राप्ते काले भवति केनचित् ।
यदहं त्वां रणे दृष्ट्वा हतं जीवामि दुर्भगा ॥ ११-२०-२४ (६५३९१)
कामिदानीं नरव्याघ्र श्लक्ष्णया स्मितया गिरा ।
पितृलोके समेत्यान्यां मामिवामन्त्रयिष्यसि ॥ ११-२०-२५ (६५३९२)
नूनमप्सरसां स्वर्गे मनांसि प्रमथिष्यसि ।
परमेण च रूपेण गिरा च स्मितपूर्वया ॥ ११-२०-२६ (६५३९३)
प्राप्य पुण्यकृताँल्लोकानप्सरोभिः समेयिवान् ।
सौभद्र विहन्काले स्मरेथाः सुकृतानि मे ॥ ११-२०-२७ (६५३९४)
एतावानिह संवासो विहितस्ते मया सह ।
षण्मासान्सप्तमे मासि त्वं वीर निधनं गतः ॥ ११-२०-२८ (६५३९५)
इत्युक्तवचनामेनामपकर्षन्ति दुःखिताम् ।
उत्तरां मोघसङ्कल्पां मत्स्यराजकुलस्त्रियः ॥ ११-२०-२९ (६५३९६)
उत्तरामपकृष्यैनामार्तामार्ततराः स्वयम् ।
विराटं निहतं दृष्ट्वा क्रोशन्ति विलपन्ति च ॥ ११-२०-३० (६५३९७)
द्रोणास्त्रशरसङ्कृत्तं शयानं रुधिरोक्षितम् ।
विराटं वितुदन्त्येते गृध्रगोमायुवायसाः ॥ ११-२०-३१ (६५३९८)
वितुद्यमानं विहगैर्विराटमसितेक्षणाः ।

न शक्नुवन्ति विहगान्निवारयितुमातुराः ॥ ११-२०-३२ (६५३९९)
आसामातपतप्तानामायासेन च योषिताम् ।
श्रमेण च विवर्णानां वक्त्राणां विप्लुतं वपुः ॥ ११-२०-३३ (६५४००)
उत्तरं चाभिमन्युं च काम्भोजं च सुदक्षिणम् ।
कार्ष्णिनाऽभिहतं पश्य लक्ष्मणं प्रियदर्शनम्। ११-२०-३४ (६५४०१)
आयोधनशिरोमध्ये शयानं पश्य माधव ॥ ॥ ११-२०-३५ (६५४०२)

इति श्रीमन्महाभारते कर्णपर्वणि

Mahabharata - Strii Parva - Chapter Footnotes

११-२०-१ अध्यर्धगुणं सार्धगुणम् ॥
१ ॥
११-२०-२४ दुष्करं पुनरप्राप्तं काले भवति केनचित् इति क.पाठः
। दुष्करं प्रति न प्राप्तमित्यादि छ.ट। पाठः ॥
११-२०-३३ वपुः शस्ताकृतिः । वपुः क्लीबं तनौ शस्ताकृतावपीति मेदिनी ॥
११-२०-२० विंशतितमोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०२१
॥ श्रीः ॥
११.२१. अध्यायः २१

Mahabharata - Strii Parva - Chapter Topics

गान्धार्या कृष्णंप्रति बाह्लिकादीनां तथा तत्स्त्रीणां च प्रदर्शनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-२१-० (६५४०३)
गान्धार्युवाच। ११-२१-०क्ष् (५३५६)
आवन्त्यं भीमसेनेन भक्षयन्ति निपातितम् ।
गृध्रगोमायवः शूरं दूरबन्धुमबन्धुवत् ॥ ११-२१-१ (६५४०४)
तं पश्य कदनं कृत्वा शूरणां मधुसूदन ।
शयानं वीरशयने रुधिरेण समुक्षितम् ॥ ११-२१-२ (६५४०५)
तं सृगालाश्च कङ्काश्च क्रव्यादाश्च पृथग्विधाः ।
तेनतेन विकर्षन्ति पश्य कालस्य पर्ययम् ॥ ११-२१-३ (६५४०६)
शयानं वीरशयने शूरमाक्रन्दकारिणम् ।
आवन्त्यमभितो नार्यो रुदत्यः पर्युपासते ॥ ११-२१-४ (६५४०७)

प्रातिपेयं महेष्वासं हत भीमेन बाह्लिकम् ।
प्रसुप्तमिव शार्दूलं पश्य कृष्णमनस्विनम् ॥ ११-२१-५ (६५४०८)
अतीव मुखवर्णोऽस्य निहतस्यापि शोभते ।
सोमस्यवाभिपूर्णस्य पौर्णमास्यां समुद्यतः ॥ ११-२१-६ (६५४०९)
पुत्रशोकाभितप्तेन प्रतिज्ञां चाभिरक्षता ।
पाकशासनिना सङ्ख्ये वार्धक्षत्रिर्निपातितः ॥ ११-२१-७ (६५४१०)
एकादशचमूर्भित्त्वा रक्ष्यमाणं महात्मभिः ।
सत्यं चिकीर्षता पश्य हतमेनं जयद्रथम् ॥ ११-२१-८ (६५४११)
सिन्धुसौवीरभर्तारं दर्पपूर्णं मनस्विनम् ।
भक्षयन्ति शिवा गृध्रा जनार्दन जयद्रथम् ॥ ११-२१-९ (६५४१२)
संरक्ष्यमाणं भार्याभिरनुरक्ताभिरच्युत ।
भीषयन्त्यो विकर्षन्ति गहनं निम्नमन्तिकात् ॥ ११-२१-१० (६५४१३)
तमेताः पर्युपासन्ते वीक्षमाणा महाभुजम् ।
सिन्धुसौवीरकाम्भोजगान्धारयवनस्त्रियः ॥ ११-२१-११ (६५४१४)
यदा कृष्णामुपादाय प्राद्रवत्केकयैः सह ।
तदैव वध्यः पाण्डूनां जनार्दन जयद्रथः ॥ ११-२१-१२ (६५४१५)
दुःशलां मानयद्भिस्तु तदा मुक्तो जयद्रथः ।
कथमद्य न तां कृष्ण मानयन्ति स्म ते पुनः ॥ ११-२१-१३ (६५४१६)
सैन्धवं मे सुता बाला प्रस्खलन्तीव दुःखिता ।
प्रमापयन्ती चात्मानमाक्रोशन्तीव पाण्डवान् ॥ ११-२१-१४ (६५४१७)
किन्नु दुःखतरं कृष्ण परं मम भविष्यति ।
यत्सुता विधवा बाला स्नुषाश्च निहतेश्वराः ॥ ११-२१-१५ (६५४१८)
हाहा धिग्धुःशलां पश्य वीतशोकभयामिव ।
भर्तुः शिर अपश्यन्तीं धावमानामितस्ततः ॥ ११-२१-१६ (६५४१९)
वारयामास यः सर्वान्पाण्डवान्पुत्रगृद्धिनः ।
स हत्वा विपुलाः सेनाः स्वयं मृत्युवशं गतः ॥ ११-२१-१७ (६५४२०)
तं मत्तमिव मातङ्गं वीरं परमदुर्जयम् ।
परिवार्य रुदन्त्येताः स्त्रियश्चन्द्रोपमाननाः ॥ ॥ ११-२१-१८ (६५४२१)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वमि द्वाविंशोऽध्यायः ॥ २२ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-२१-१३ कलावशेषो हि इति क । पाठः ॥
११-२१-१४ रोरूयते दुःखचयाभितप्ता इति क ट पाठः ॥
११-२१-२१ एकविंशतितमोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०२२
॥ श्रीः ॥
११.२२. अध्यायः २२

Mahabharata - Strii Parva - Chapter Topics
गान्धार्या कृष्णम्प्रति बाह्लिकादीनां तथा तत्स्त्रीणां च प्रदर्शनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-२२-० (६५४२२)
गान्धार्युवाच। ११-२२-०क्ष् (५३५७)
आवनत्यं भीमसेनेन भक्षयन्ति निपातितम् ।
गृध्रगोमायवः शूरं दूरबन्धुमबन्धुवत् ॥ ११-२२-१ (६५४२३)
तं पश्य कदनं कृत्वा शूराणां मधुसूदन ।
शयानं वीरशयने रुधिरेण समुक्षितम् ॥ ११-२२-२ (६५४२४)
तं सृगालाश्च कङ्काश्च क्रव्यादाश्च पृथग्विधाः ।
तेनतेन विकर्षन्ति पश्य कालस्य पर्ययम् ॥ ११-२२-३ (६५४२५)
शयानं वीरशयने शूरमाक्रन्दकारिणम् ।
आवन्त्यमभितो नार्यो रुदत्यः पर्युपासते ॥ ११-२२-४ (६५४२६)
प्रातिपेयं महेष्वासं हतं भीमेन बाह्लिकम् ।
प्रसुप्तमिव शार्दुलं पश्य कृष्णमनस्विनम् ॥ ११-२२-५ (६५४२७)
अतीव मुखवर्णोऽस्य निहतस्यापि शोभते ।
सोमस्यवाभिपूर्णस्य पौर्णमास्यां समुद्यतः ॥ ११-२२-६ (६५४२८)
पुत्रशोकाभितप्तेन प्रतिज्ञां चाभिरक्षता ।
पाकशासनिना सङ्ख्ये वार्धक्षत्रिर्निपातितः ॥ ११-२२-७ (६५४२९)
एकादशचमूर्भित्त्वा रक्ष्यमाणं महात्मभिः ।
सत्यं चिकीर्षता पश्य हतमेनं जयद्रथम् ॥ ११-२२-८ (६५४३०)
सिन्धुसौवीरभर्तारं दर्पपूर्णं मनस्विनम् ।
भक्षयन्ति शिवा गृध्रा जनार्दन जयद्रथम् ॥ ११-२२-९ (६५४३१)
संरक्ष्यमाणं भार्याभिरनुरक्ताभिरच्युत ।
भीषयन्त्यो विकर्षन्ति गहनं निम्नमन्तिकात् ॥ ११-२२-१० (६५४३२)
तमेताः पर्यपासन्ते वीक्षमाणा महाभुजम् ।
सिन्धुसौवीरकाम्भोजगान्धारयवनस्त्रियः ॥ ११-२२-११ (६५४३३)
यदा कृष्णामुपादाय प्राद्रवत्केकयैः सह ।
तदैव वध्यः पाण्डूनां जनार्दन जयद्रथः ॥ ११-२२-१२ (६५४३४)
दुःशलां मानयद्भिस्तु तदा मुक्तो जयद्रथः ।

कथमद्य न तां कृष्ण मानयन्ति स्म ते पुनः ॥ ११-२२-१३ (६५४३५)
सैन्धवं मे सुता बाला प्रस्स्वलन्तीव दुःखिता ।
प्रमापयन्ती चात्मानमाक्रोशन्तीव पाण्डवान् ॥ ११-२२-१४ (६५४३६)
किन्नु दुःखतरं कृष्ण परं मम भविष्यति ।
यत्सुता विधवा बाला स्नुषाश्च निहतेश्वराः ॥ ११-२२-१५ (६५४३७)
हाहा धिग्धुःशलां पश्य वीतशोकभयामिव ।
भर्तुः शिर अपश्यन्तीं धावमानामितस्ततः ॥ ११-२२-१६ (६५४३८)
वारयामास यः सर्वान्पाण्डवान्पुत्रगृद्धिनः ।
स हत्वा विपुलाः सेनाः सर्वयं मृत्युवशं गतः ॥ ११-२२-१७ (६५४३९)
तं मत्तमिव मातङ्गं वीरं परमदुर्जयम् ।
परिवार्य रुदन्त्येताः स्त्रियश्चन्द्रोपमाननाः ॥ ॥ ११-२२-१८ (६५४४०)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-२२-७ बार्धक्षत्रिर्जयद्रथः ॥
११-२२-२२ द्वाविंशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०२३
॥ श्रीः ॥
११.२३. अध्यायः २३

Mahabharata - Strii Parva - Chapter Topics
कृष्णप्रति गान्धार्या भीष्मद्रोणादिगुणानुवर्णनपूर्वकं
तत्तच्छरीराणां विलपन्तीनां तत्स्त्रीणां च प्रदर्शनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-२३-० (६५४४१)
गान्धार्युवाच। ११-२३-०क्ष् (५३५८)
एष शल्यो हतः शेते साक्षान्नकुलमातुलः ।
धर्मज्ञेन हतस्तात धर्मराजेन संयुगे ॥ ११-२३-१ (६५४४२)
यस्त्वया स्पर्धते नित्यं सर्वत्र पुरुषर्षभ ।
स एष निहतः शेते मद्रराजो महाबलः ॥ ११-२३-२ (६५४४३)
ग्जयद्रथे यदि ब्रूयुरुपरोधं कथञ्चन ।
मद्रपुत्रे कथं ब्रूयुरुपरोधं विवक्षवः ॥' ११-२३-३ (६५४४४)

येन सङ्गृह्णता तात रथमाधिरथेर्युधि ।
जयार्थं पाण्डुपुत्राणां तदा तेजोवधः कृतः ॥ ११-२३-४ (६५४४५)
अहो धिक्फश्य शल्यस्य पूर्णचन्द्रसुदर्शनम् ।
मुखं प्द्मपलाशाक्षं काकैरादष्टमव्रणम् ॥ ११-२३-५ (६५४४६)
एषा चामीकराभस्य तप्तकाञ्चनसप्रभा ।
आस्याद्विनिः सृता जिह्वा भक्ष्यते कृष्ण पक्षिभिः ॥ ११-२३-६ (६५४४७)
युधिष्ठिरेण निहतं शल्यं समितिशोभनम् ।
रुदन्त्यः पर्युपासन्ते मद्रराजं कुलाङ्गनाः ॥ ११-२३-७ (६५४४८)
एताः सुसूक्ष्मवसना मद्रराजं नरर्षभम् ।
क्रोशन्त्योऽथ समासाद्य क्षत्रियाः क्षत्रियर्षभम् ॥ ११-२३-८ (६५४४९)
शल्यं निपतितं नार्यः परिवार्याभितः स्थिताः ।
वासिता गृष्टयः पङ्के परिमग्नमिवर्षभम् ॥ ११-२३-९ (६५४५०)
शल्यं शरणदं शूरं पश्येमं वृष्णिनन्दन ।
शयानं वीरशयने शरैर्विशकलीकृतम् ॥ ११-२३-१० (६५४५१)
एष शैलालयो राजा भगदत्तः प्रतापवान् ।
गजाङ्कुशधरः श्रीमाञ्शेते भुवि निपातितः ॥ ११-२३-११ (६५४५२)
यस्य रुक्ममयी माला शिरस्येषा विराजते ।
श्वापदैर्भक्ष्यमाणस्य शोभयन्तीव मूर्धजान् ॥ ११-२३-१२ (६५४५३)
एतेन किल पार्थस्य युद्धमासीत्सुदारुणम् ।
रोमहर्षणमत्युग्रं शक्रस्य त्वहिना यथा ॥ ११-२३-१३ (६५४५४)
योधयित्वा माहाबाहुरेष पार्थं धनञ्जयम् ।
संशयं गमयित्वा च कुन्तीपुत्रेण पातितः ॥ ११-२३-१४ (६५४५५)
यस्य नास्ति समो लोके शौर्ये वीर्ये च कश्चन् ।
स एष निहतः शेते भीष्मो भीष्मकृदाहवे ॥ ११-२३-१५ (६५४५६)
पश्य शान्तनवं कृष्ण शयानं सूर्यवर्चसम् ।
युगान्त इव कालेन पातितं सूर्यमम्बरात् ॥ ११-२३-१६ (६५४५७)
एष तप्त्वा रणे शत्रूञ्शस्त्रतापेन वीर्यवान् ।
नरसूर्योऽस्तमभ्येति सूर्योऽस्तमिव केशव ॥ ११-२३-१७ (६५४५८)
शरतल्पगतं भीष्ममूर्ध्वरेतसमच्युतम् ।
शयानं वीरशयने पश्य शूरनिषेविते ॥ ११-२३-१८ (६५४५९)
कर्णिनालीकनाराचैरास्तीर्य शयनोत्तमम् ।
आविश्य शेते भगवान्स्कन्दः शरवणं यथा ॥ ११-२३-१९ (६५४६०)
अतूलपूर्णं गाङ्गेयस्त्रिभिर्बाणैः समन्वितम् ।
उपधायोपधानाग्र्यं दत्तं गाण्डीवधन्वना ॥ ११-२३-२० (६५४६१)
पालयानः पितुः शास्त्रमूर्ध्वरेता महायशाः ।
एष शान्तनवः शेते माधवाप्रतिमो युधि ॥ ११-२३-२१ (६५४६२)

धर्मात्मा तात सर्वज्ञः पारावर्येण निर्णये ।
अमर्त्य इव मर्त्यः सन्नेष प्राणानधारयत् ॥ ११-२३-२२ (६५४६३)
नास्ति युद्धे कृती कश्चिन्न विद्वान्न पराक्रमी ।
यत्र शान्तनवो भीष्मः शेतेऽद्य निहतः परैः ॥ ११-२३-२३ (६५४६४)
स्वयमेतेन शूरेण पृच्छ्यमानेन पाण्डवैः ।
धर्मज्ञेनाहवे मृत्युरादिष्टः सत्यवादिना ॥ ११-२३-२४ (६५४६५)
प्रनष्टः कुरुवंशश्च पुनर्येन समुद्धृतः ।
स गतः कुरुभिः सार्धं महाबुद्धिः पराभवम् ॥ ११-२३-२५ (६५४६६)
धर्मेण कुरवः केन परिप्रक्ष्यन्ति माधव ।
हते देवव्रते भीष्मे देवकल्पे नरर्षभे ॥ ११-२३-२६ (६५४६७)
अर्जुनस्य विनेतारमाचार्यं सात्यकेस्तथा ।
तं पश्य पतितं द्रोणं कुरूणां गुरुमुत्तमम् ॥ ११-२३-२७ (६५४६८)
अस्त्रं चतुर्विधं वेद यथैव त्रिदशेश्वरः ।
भार्गवो वा महावीर्यस्तथा द्रोणोऽपि माधव ॥ ११-२३-२८ (६५४६९)
यस्य प्रसादाद्बीभत्सुः पाण्डवः कर्म दुष्करम् ।
चकार स हतः शेते नैनमस्त्राण्यपालयन् ॥ ११-२३-२९ (६५४७०)
यं पुरोधाय कुरव आह्वयन्ति स्म पाण्डवान् ।
सोऽयं शस्त्रभृतां श्रेष्ठो द्रोणः शस्त्रपृथक्कृतः
॥ ११-२३-३० (६५४७१)
यस्य निर्दहतः सेनां गतिरग्नरिवाभवत् ।
स भूमौ निहतः शेते शान्तार्चिरिव पावकः ॥ ११-२३-३१ (६५४७२)
धनुर्मुष्टिरशीर्णश्च हस्तावापश्च माधव ।
द्रोणस्य निहतस्यापि दृश्यते जीवतो यथा ॥ ११-२३-३२ (६५४७३)
वेदा यस्माच्च चत्वारः सर्वाण्यस्त्राणि केशव ।
अनपेतानि वै शूराद्यथैवादौ प्रजापतेः ॥ ११-२३-३३ (६५४७४)
चन्दनार्हाविमौ तस्य बन्दिभिर्वन्दितौ शुभौ ।
गोमायवो विकर्षन्ति पादौ शिष्यशतार्चितौ ॥ ११-२३-३४ (६५४७५)
द्रोणं द्रुपदपुत्रेण निहतं मधुसूदन ।
कृपी कृपणमन्वास्ते दुःखोपहतचेतना ॥ ११-२३-३५ (६५४७६)
तां पश्य रुदतीमार्तां मुक्तकेशीमधोमुखीम् ।
हतं पतिमुपासन्तीं द्रोणं शस्त्रभृतां वरम् ॥ ११-२३-३६ (६५४७७)
बाणैर्भिन्नतनुत्राणं धृष्टद्युम्नेन केशव ।
उपास्ते वै मृधे द्रोणं जटिला ब्रह्मचारिणी ॥ ११-२३-३७ (६५४७८)
प्रेतकृत्ये च यतते कृपी कृपणमातुरा ।
हतस्य समरे भर्तुः सुकुमारी यशस्विनी ॥ ११-२३-३८ (६५४७९)
अग्नीनाधाय विविधवच्चितां प्रज्वाल्य सर्वतः ।

द्रोणमाधाय गायन्ति त्रीणि सामानि सामगाः ॥ ११-२३-३९ (६५४८०)
कुर्वन्ति च चितामेते जटिला ब्रह्मचारिणः ।
धनुर्भिः शक्तिभिश्चैव रथनीडैश्च माधव ॥ ११-२३-४० (६५४८१)
शरैश्च विविधैरन्यैर्धक्ष्यन्ते भूरितेजसम् ।
त एते द्रोणमादाय गायन्ति च रुदन्ति च ॥ ११-२३-४१ (६५४८२)
सामभिस्त्रिभिरन्तस्थैरनुशंसन्ति चापरे ।
अग्नावग्निं समाधाय द्रोणं हुत्वा हुताशने ॥ ११-२३-४२ (६५४८३)
गच्छन्त्यभिमुखा गङ्गां द्रोणशिष्या द्विजातयः ।
अपसव्यां चितिं कृत्वा पुरस्कृत्य कृपीं तथा ॥ ॥ ११-२३-४३ (६५४८४)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि त्रयोविंशोऽध्यायः
॥ २३ ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-२३-९ परिमग्निमिव द्विपमिति झ पाठः ॥
११-२३-१३ अहिना वृत्रासुरेण ॥
११-२३-१५ भीष्मकृत् भयङ्करकर्मकृत् ॥
११-२३-२१ शास्त्रं आम्नाम् ॥
११-२३-२२ निर्णिये पारावर्येण । परावरौ परलोकेहलोकौ तद्विषयेण ज्ञानेन। तत्त्वज्ञानबलेन प्राणानधारयदित्यर्थः। पारपर्येऽथ निर्णय इति छ पाठः। पाराशर्यस्य निर्णये इति क ट पाठः ॥
११-२३-२६ धर्मेषु कुरवः कं नु परिप्रक्ष्यन्ति माधव । गते देवव्रते स्वर्गं देवकल्पे नरर्षभे इति झ पाठः ॥
११-२३-३४ शिष्यशरार्चिताविति क पाठः ॥
११-२३-२३ त्रोयविंशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०२४
॥ श्रीः ॥
११.२४. अध्यायः २४

Mahabharata - Strii Parva - Chapter Topics
कृष्णम्प्रति गान्धार्य भूरिश्रवः प्रभृतिशरीराणां तत्तस्त्रीणां च प्रदर्शनम् ॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-२४-० (६५४८५)
गान्धार्युवाच। ११-२४-०क्ष् (५३५९)
सोमदत्तसुतं पश्य युयुधानेन पातितम् ।
वितुद्यमानं विहगैर्बहुभिर्माधवान्तिके ॥ ११-२४-१ (६५४८६)
पुत्रशोकाभिसन्तप्तः शोमदत्तो जनार्दन ।
युयुधानं महेष्वासं गर्हयन्निव दृश्यते ॥ ११-२४-२ (६५४८७)
असौ हि भूरिश्वसो माता शोकपरिप्लुता ।
आश्वासयति भर्तारं सोमदत्तमनिन्दिता ॥ ११-२४-३ (६५४८८)
दिष्ट्या नैनं महाराज दारुणं भरतक्षयम् ।
कुरुसङ्क्रन्दनं घोरं युगान्तमनुपश्यसि ॥ ११-२४-४ (६५४८९)
दिष्ट्या यूपध्वजं पुत्रं वीरं भूरिसहस्रदम् ।
अनेकक्रतुयज्वानं निहतं नानुपश्यसि ॥ ११-२४-५ (६५४९०)
दिष्ट्या स्नुषाणामाक्रन्दे घोरं विलपितं बहु ।
न शृणोषि महाराज सारसीनामिवार्णवे ॥ ११-२४-६ (६५४९१)
एकवस्त्रास्तु पञ्चैताः प्रकीर्णासितमूर्धजाः ।
स्नुषास्ते परिधावन्ति हतापत्या हतेश्वराः ॥ ११-२४-७ (६५४९२)
श्वापदैर्भक्ष्यमाणं त्वमहो दिष्ट्या न पश्यसि ।
छिन्नबाहुं नरव्याघ्रमर्जुनेन निपातितम् ॥ ११-२४-८ (६५४९३)
शलं विनिहतं सङ्ख्ये भूरिश्रवसमेव च ।
स्नुषाश्च विविधाः सर्वा दिष्ट्या नाद्येह पश्यसि ॥ ११-२४-९ (६५४९४)
दिष्ट्या तत्काञ्चनं छत्रं यूपकेतोर्महात्मनः ।
विनीकीर्णं रथोपस्थे सौमदत्तेर्न पश्यसि ॥ ११-२४-१० (६५४९५)
अमूस्तु भूरिश्रवसो भार्याः सात्यकिना हतम् ।
परिवार्यानुशोचन्ति भर्तारमसितेक्षणाः ॥ ११-२४-११ (६५४९६)
एता विलप्य करुणं भर्तृशोकेन कर्शिताः ।
पतन्त्यभिमुखा भूमौ कृपणं बत केशव ॥ ११-२४-१२ (६५४९७)
बीभत्सुरतिबीभत्सं कर्मेदमकरोत्कथम् ।
प्रमत्तस्य यदच्छैत्सीद्बाहुं शूरस्य यज्वनः ॥ ११-२४-१३ (६५४९८)
ततः पापतरं कर्म कृतवानपि सात्यकिः ।
यस्मात्प्रायोपविष्टस्य प्राहार्षीत्संशितात्मनः ॥ ११-२४-१४ (६५४९९)
एको द्वाभ्यां हतः शेते क्षत्रधर्मेण धार्मिकः ।
किन्नु वक्ष्यति वै सत्सु गोष्ठीषु च सभासु च ॥ ११-२४-१५ (६५५००)
अपुण्यमयशस्यं च कर्मेदं सात्यकिः स्वयम् ।
इति यूपध्वजस्यैताः स्त्रियः क्रोशन्ति माधव ॥ ११-२४-१६ (६५५०१)
भार्या यूपध्वजस्यैषा करसम्मितमध्यमा ।
कृत्वोत्सङ्गे भुजं भर्तुः कृपणं परिदेवति ॥ ११-२४-१७ (६५५०२)

अयं स हन्ता शूराणां मित्राणामभयप्रदः ।
प्रदाता गोसहस्राणां क्षत्रियान्तकरः करः ॥ ११-२४-१८ (६५५०३)
अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥ ११-२४-१९ (६५५०४)
वासुदेवस्य सान्निध्ये पार्थेनाक्लिष्टकर्मणा ।
युध्यतः समरेऽन्येन प्रमत्तस्य निपातितः ॥ ११-२४-२० (६५५०५)
किन्नु वक्ष्यसि संसत्सु कथासु च जनार्दन ।
अर्जुनस्य महत्कर्म स्वयं वा स किरीटभृत् ॥ ११-२४-२१ (६५५०६)
इत्येवं गर्हयित्वैषा तूष्णीमास्ते वराङ्गना ।
तामेतामनुशोचन्ति सपत्न्यः स्वामिव स्नुषाम् ॥ ११-२४-२२ (६५५०७)
गान्धारराजः शकुनिर्बलवान्सत्यविक्रमः ।
निहतः सहदेवेन भागिनेमेन मातुलः ॥ ११-२४-२३ (६५५०८)
यः पुरा हेमदण्डाभ्यां व्यजनाभ्यां स्म वीज्यते ।
स एष पक्षिभिः पक्षैः शयान उपवीज्यते ॥ ११-२४-२४ (६५५०९)
यः स्वरूपाणि कुरुते शतशोऽथ सहस्रशः ।
तस्य मायाविनो माया दग्धाः पाण्डवतेजसा ॥ ११-२४-२५ (६५५१०)
मायया निकृतिप्रज्ञो जितवान्यो युधिष्ठिरम् ।
सभायां विपुलं राज्यं स जहौ जीवितं कथम् ॥ ११-२४-२६ (६५५११)
शकुन्ताः शकुनिं कृष्ण समन्तात्पर्युपासते ।
कितवं मम पुत्राणां विनाशायोपशिक्षितम् ॥ ११-२४-२७ (६५५१२)
एतेनैतन्महद्वैरं प्रसक्तं पाण्डवैः सह ।
वधाय मम पुत्राणामात्मनः सगणस्य च ॥ ११-२४-२८ (६५५१३)
यथैव मम पुत्राणां लोकाः शस्त्रजिताः प्रभो ।
एवमस्यापि दुर्बुद्धेर्लोकाः शस्त्रेण वै जिताः ॥ ११-२४-२९ (६५५१४)
कथं च नायं तत्रापि पुत्रान्मे भ्रातृभिः सह ।
विरोधयेदृजुप्रज्ञाननृजुर्मधुसूदन ॥ ॥ ११-२४-३० (६५५१५)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि चतुर्विंशोऽध्यायः
॥ २४ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-२४-१३ बीभत्सुरतिनिर्मलकर्मा । अतिबीभत्सं अतिगर्हितम् ॥
११-२४-१५ अको द्वाभ्यां हतः शेषे त्वमधर्मेण धार्मिक इति झ पाठः ॥
११-२४-२६ स पुनर्जीवितं जित इति झ पाठः ॥
११-२४-२४ चतुर्विंशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०२५
॥ श्रीः ॥
११.२५. अध्यायः २५

Mahabharata - Strii Parva - Chapter Topics
कृष्णम्प्रति गान्धार्या कुरुपाण्डवसंक्षयस्य
कृष्णोपेक्षणहेतुकत्वकथनपूर्वकं सर्वबन्धुसंक्षयाय शापदानम्
॥ १ ॥

Mahabharata - Strii Parva - Chapter Text

११-२५-० (६५५१६)
गान्धार्युवाच। ११-२५-०क्ष् (५३६०)
काम्भोजं पश्य दुर्धर्षं काम्भोजास्तरणोचितम् ।
शयानमृषभस्कन्धं हतं पांसुषु माधव ॥ ११-२५-१ (६५५१७)
अस्य क्षतजसन्दिग्धौ बाहू चन्दनरूषितौ ।
अवेक्ष्य कृपणं भार्या विलपत्यतिदुःखिता ॥ ११-२५-२ (६५५१८)
इमौ तौ परिघप्रख्यौ बाहू चन्दनरूषितौ ।
ययोर्विवरमापन्नां न रतिर्मां पुराऽजहात् ॥ ११-२५-३ (६५५१९)
कां गतिं तु गमिष्यामि त्वया हीना जनेश्वर ।
दूरबन्धुरनाथा च वेपन्ती मधुरस्वरा ॥ ११-२५-४ (६५५२०)
आतपे क्लाम्यमानानां विविधानामिव स्रुजाम् ।
क्लान्तानामपि नारीणां जहाति श्रीर्न वै तनूः ॥ ११-२५-५ (६५५२१)
शयानमभितः शूरं कालिङ्गं मधुसूदन ।
पश्य दीप्ताङ्गदयुतं प्रतिमानं धनुष्मताम् ॥ ११-२५-६ (६५५२२)
मागधानामधिपतिं जयत्सेनं जनार्दन ।
परिवार्य प्ररुदिता मागध्यः पश्य योषितः ॥ ११-२५-७ (६५५२३)
हरिणायतनेत्राणां सुस्वराणां जनार्दन ।
मनः श्रुतिहरो नादो मनो मोहयतीव मे ॥ ११-२५-८ (६५५२४)
प्रकीर्णवस्त्राभरणा रुदत्यः शोककर्शिताः ।
स्वास्तीर्णशयनोपेता मागध्यः शेरते भुवि ॥ ११-२५-९ (६५५२५)
कोसलानामधिपतिं राजपुत्रं बृहद्बलम् ।
भर्तारं परिवार्यैताः पृथक्प्ररुदिताः स्त्रियः ॥ ११-२५-१० (६५५२६)
अस्य गात्रगतान्बाणान्कार्ष्णिबाहुबलेरितान् ।
उद्धरन्त्यसुखाविष्टा मूर्च्छमानाः पुनः पुनः ॥ ११-२५-११ (६५५२७)
आसां सर्वानवद्यानामातपेन परिश्रमात् ।

प्रम्लाननलिनाभानि भान्ति वक्त्राणि माधव ॥ ११-२५-१२ (६५५२८)
द्रोणेन निहताः शूरा शेरते रुचिराङ्गदाः ।
धृष्टद्युम्नसुताः सर्वे शिशवो हेममालिनः ॥ ११-२५-१३ (६५५२९)
रथाग्न्यगारं चापार्चिं शरशक्तिगदेन्धनम् ।
द्रोणमासाद्य निर्दग्धाः शलभा इव पावकम् ॥ ११-२५-१४ (६५५३०)
तथैव निहताः शूराः शेरते रुचिराङ्गदाः ।
द्रोणेनाभिमुखाः सङ्ख्ये भ्रातरः पञ्च केकयाः ॥ ११-२५-१५ (६५५३१)
तप्तकाञ्चनवर्माणस्तालध्वजरथव्रजाः ।
भासयन्ति महीं भासा ज्वलिता इव पावकाः ॥ ११-२५-१६ (६५५३२)
द्रोणेन द्रुपदं सङ्ख्ये पश्य माधव पातितम् ।
महाद्विपमिवारण्ये सिंहेन महता हतम् ॥ ११-२५-१७ (६५५३३)
पाञ्चालराज्ञो विमलं पुण्डरीकाक्ष पाण्डुरम् ।
आतपत्रं समाभाति शरदीव निशाकरः ॥ ११-२५-१८ (६५५३४)
एतास्तु द्रुपदं वृद्धं स्नुषा भार्याश्च दुःखिताः ।
दग्ध्वा गच्छन्ति पाञ्चालराजानमपसव्यतः ॥ ११-२५-१९ (६५५३५)
धृष्टकेतुं महात्मानं चेदिपुङ्गवमङ्गनाः ।
द्रोणेन निहतं शूरं हरन्ति हृतचेतसः ॥ ११-२५-२० (६५५३६)
द्रोणास्त्रमभिहत्यैष विमर्दे मधुसूदन ।
महेष्वासो हतः शेते वज्राहत इव द्रुमः ॥ ११-२५-२१ (६५५३७)
एष चेदिपतिः शूरो धृष्टकेतुर्महारथः ।
शेते विनिहतः सङ्ख्ये हत्वा शत्रून्सहस्रशः ॥ ११-२५-२२ (६५५३८)
वितुद्यमानं विहगैस्तं भार्याः पर्युपाश्रिताः ।
चेदिराजं हृषीकेश हतं सबलबान्धवम् ॥ ११-२५-२३ (६५५३९)
दाशार्हपुत्रजं वीरं शयानं सत्यविक्रमम् ।
आरोप्याङ्के रुदन्त्येताश्चेदिराज वराङ्गनाः ॥ ११-२५-२४ (६५५४०)
अस्य पुत्रं हृषीकेश सुवक्त्रं चारुकुण्डलम् ।
द्रोणेन समरे पश्य निकृत्तं बहुधा शरैः ॥ ११-२५-२५ (६५५४१)
पितरं नूनमाजिस्थं युध्यमानं परैः सह ।
नाजहात्पितरं वीरमद्यापि मधुसूदन ॥ ११-२५-२६ (६५५४२)
एवं ममापि पुत्रस्य पुत्रः पितरमन्वगात् ।
दुर्योधनं महाबाहो लक्ष्मणः परवीरहा ॥ ११-२५-२७ (६५५४३)
विन्दानुविन्दावावन्त्यौ पतितौ पश्य माधव ।
हिमान्ते पुष्पितौ शालौ मरुता गलिताविव ॥ ११-२५-२८ (६५५४४)
काञ्चनाङ्गदवर्माणौ बाणखड्गधनुर्धरौ ।
ऋषभप्रतिरूपाक्षौ शयानौ विमलस्रजौ ॥ ११-२५-२९ (६५५४५)
अवध्याः पाण्डवाः कृष्ण सर्व एव त्वया सह ।

ये मुक्ता द्रोणभीष्माभ्यां कर्णाद्वैकर्तनात्कृपात् ॥ ११-२५-३० (६५५४६)
दुर्योधनाद्द्रोणसुतात्सैन्धवाच्च जयद्रथात् ।
सोमदत्ताद्विकर्णाच्च शूराच्च कृतवर्मणः ॥ ११-२५-३१ (६५५४७)
ये हन्युः शस्त्रवेगेन देवानपि नरर्षभाः ।
त इमे निहताः सङ्ख्ये पश्य कालस्य पर्ययम् ॥ ११-२५-३२ (६५५४८)
नातिभारोऽस्ति दैवस्य ध्रुवं माधव कश्चन ।
यदिमे निहताः शूराः क्षत्रियैः क्षत्रियर्षभाः ।
ग्शूराश्च कृतविद्याश्च मम पुत्रा मनस्विनः'॥ ११-२५-३३ (६५५४९)
तदैव निहताः कृष्ण मम पुत्रास्तरस्विनः ।
यदैवाकृतकामस्त्वमुपप्लाव्यं गतः पुनः ॥ ११-२५-३४ (६५५५०)
शन्तनोश्चैव पुत्रेण प्राज्ञेन विदुरेण च ।
तदैवोक्तास्मि मा स्नेहं कुरुष्वात्मसुतेष्विति ॥ ११-२५-३५ (६५५५१)
तयोर्हि दर्शनं नैतन्मिथ्या भवितुमर्हति ।
अचिरेणैव मे पुत्रा भस्मीभूता जनार्दन ॥ ११-२५-३६ (६५५५२)
वैशम्पायन उवाच। ११-२५-३७क्ष् (५३६१)
इत्युक्त्वा न्यपतद्भूमौ गान्धारी शोकमूर्च्छिता ।
दुःखोपहतविज्ञाना धैर्यमुत्सृज्य भारत ॥ ११-२५-३७ (६५५५३)
ततः कोपपरीताङ्गी पुत्रशोकपरिप्लुता ।
जगाद शौरिं दोषेण गान्धारी व्यथितेन्द्रिया ॥ ११-२५-३८ (६५५५४)
गान्धार्युवाच। ११-२५-३९क्ष् (५३६२)
पाण्डवाः धार्तराष्ट्राश्च क्रुद्धाः कृष्ण परस्परम् ।
उपेक्षिता विनश्यन्तस्त्वया कस्माज्जनार्दन ॥ ११-२५-३९ (६५५५५)
शक्तेन बहुभृत्येन विपुले तिष्ठता बले ।
उभयत्र समर्थेन श्रुतवाक्येन चैव ह ॥ ११-२५-४० (६५५५६)
इच्छतोपेक्षितो नाशः कुरूणां मधुसूदन ।
यस्मात्त्वया महाबाहो फलं तस्मादवाप्नुहि ॥ ११-२५-४१ (६५५५७)
पतिशुश्रूषया यन्मे तपः किञ्चिदुपार्जितम् ।
तेन त्वां दुरवापेन शपे चक्रगदाधरम् ॥ ११-२५-४२ (६५५५८)
यस्मात्परस्परं घ्नन्तो ज्ञातयः कुरुपाण्डवाः ।
उपेक्षितास्ते गोविन्द तस्माज्ज्ञातीन्वधिष्यसि ॥ ११-२५-४३ (६५५५९)
त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन ।
हतज्ञातिर्हतामात्यो हतपुत्रो वनेचरः ॥ ११-२५-४४ (६५५६०)
अनाथवदविज्ञातो लोकेष्वनभिलक्षितः ।
कुत्सितेनाभ्युपायेन निधनं समवाप्स्यसि ॥ ११-२५-४५ (६५५६१)
तवाप्येवं हतसुता निहतज्ञातिबान्धवाः ।
स्त्रियः परिपतिष्यन्ति यथैता भरतस्त्रियः ॥ ११-२५-४६ (६५५६२)

वैशम्पयन उवाच। ११-२५-४७क्ष् (५३६३)
तच्छ्रुत्वा वचनं घोरं वासुदेवो महामनाः ।
उवाच देवीं गान्धारीमीषदभ्युत्स्मयन्निव ॥ ११-२५-४७ (६५५६३)
जानेऽहमेतदप्येवं चीर्णं चरसि क्षत्रिये ।
दैवादेव विनश्यन्ति वृष्णयो नात्र संशयः ॥ ११-२५-४८ (६५५६४)
संहर्ता वृष्णिचक्रस्य नान्यो मद्विद्यते शुभे ।
अवध्यास्ते नरैरन्यैरपि वा देवदानवैः ॥ ११-२५-४९ (६५५६५)
परस्परकृतं नाशं यतः प्राप्स्यन्ति यादवाः ।
इत्युक्तवति दाशार्हे पाण्डवास्त्रस्तचेतसः ।
बभूवुर्भृशसंविग्ना निराशाश्चापि जीविते ॥ ॥ ११-२५-५० (६५५६६)

इति श्रीमन्महाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-२५-१ काम्भोजास्तरणं कम्बलविशेषः ॥
११-२५-३ बाहू शुभतलाङ्गुली इति झ पाठः ॥
११-२५-६ दीप्ताङ्गदयुगप्रतिनद्धमहाभुजमिति झ पाठः ॥
११-२५-२४ दाशार्हपुत्रजमित्यत्र पुत्र्यामपि पुत्रशब्दः ॥
११-२५-२६ पितरमिति पितृपदस्यावृत्तिः शोकाकुलत्वान्न दोषाय ॥
११-२५-३६ तयोर्भीष्मविदुरयोः दर्शनं अनागतावेक्षणम् ॥
११-२५-३८ जगादशौरिं रोषणेति ट पाठः ॥
११-२५-४७ अभ्युत्स्मयन्नीषद्ध्वंसयन् ॥
११-२५-४८ चीर्णं चरसि मदनुष्ठितमेवानुतिष्ठसि
। स्वतपोनाशार्थमिति भावः ॥
११-२५-२५ पञ्चविंशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०२६
॥ श्रीः ॥
११.२६. अध्यायः २६

Mahabharata - Strii Parva - Chapter Topics

शोकाद्भुवि पतिताया गान्धार्याः कृष्णेनाश्वासनम् ॥ १ ॥
युधिष्ठिराज्ञया विदुरसञ्जयादिभिर्मृतानां दाहक्रियाकरणम् ॥ २ ॥

Mahabharata - Strii Parva - Chapter Text

११-२६-० (६५५६७)
श्रीभगवानुवाच। ११-२६-०क्ष् (५३६४)
उत्तिष्ठोत्तिष्ठ गान्धारि मा च शोके मनः कृथाः ।
तवैव ह्यपराधेन कुरवो निधनं गताः ॥ ११-२६-१ (६५५६८)
यत्त्वं पुत्रं दुरात्मानमीर्षुमत्यन्तमानिनम् ।
दुर्योधनं पुरस्कृत्य दुष्कृतं साधु मन्यसे ॥ ११-२६-२ (६५५६९)
निष्ठुरं वैरपुरुषं वृद्धानां शासनातिगम् ।
कथमात्मकृतं दोषं मय्याधातुमिहेच्छसि ॥ ११-२६-३ (६५५७०)
मृतं वा यदि वा नष्टं योऽतीतमनुशोचति ।
दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते ॥ ११-२६-४ (६५५७१)
तपोर्थीयं ब्राह्मणी धत्त गर्भं
गौर्वोढारं धावितारं तुरङ्गी ।
शूद्रा दासं पशुपालं च वैश्या
वधार्थीयं त्वद्विधा राजपुत्री ॥ ११-२६-५ (६५५७२)
वैशम्पायन उवाच। ११-२६-६क्ष् (५३६५)
तच्छ्रुत्वा वासुदेवस्य पुनरुक्तं वचोऽप्रियम् ।
तूष्णीं बभूव गान्धारी शोकव्याकुललोचना ॥ ११-२६-६ (६५५७३)
धृतराष्ट्रस्तु राजर्षिर्निगृह्याबुद्धिजं तमः ।
पर्यपृच्छत धर्मज्ञो धर्मराजं युधिष्ठिरम् ॥ ११-२६-७ (६५५७४)
जीवतां परिमाणज्ञः सैन्यानामसि पाण्डव ।
हतानां यदि जानीषे परिमाणं वदस्वं मे ॥ ११-२६-८ (६५५७५)
युधिष्ठिर उवाच। ११-२६-९क्ष् (५३६६)
दशायुतसहस्राणि सहस्राणि च विंशतिः ।
कोट्यः षष्टिश्च षट् चैव ह्यस्मिन्राजन्मृधे हताः ॥ ११-२६-९ (६५५७६)
आलक्षाणां च वीराणां सहस्राणि चतुर्दश ।
दश चान्यानि राजेन्द्र शतं षष्टिश्च भारत ॥ ११-२६-१० (६५५७७)
धृतराष्ट्र उवाच। ११-२६-११क्ष् (५३६७)
युधिष्ठिरगतिं कां ते गताः पुरुषसत्तम ।
आचक्ष्व मे महाबाहो सर्वज्ञो ह्यसि मे मतः ॥ ११-२६-११ (६५५७८)
युधिष्ठिर उवाच। ११-२६-१२क्ष् (५३६८)
यैर्हुतानि शरीराणि हृष्टैः परमसंयुगे ।
देवराजसमाँल्लोकान्गतास्ते सत्यविक्रमाः ॥ ११-२६-१२ (६५५७९)
ये त्वहृष्टेन मनसा मर्तव्यमिति भारत ।
युध्यमाना हताः सङ्ख्ये गन्धर्वैः सह सङ्गताः ॥ ११-२६-१३ (६५५८०)
ये च सङ्ग्रामभूमिष्ठा याचमानाः पराङ्मुखाः ।

शस्त्रेण निधनं प्राप्ता गतास्ते गुह्यकान्प्रति ॥ ११-२६-१४ (६५५८१)
पात्यमानाः परैर्ये तु हीयमाना निरायुधाः ।
हीनिषेवा महात्मानः परानभिमुखा रणे ॥ ११-२६-१५ (६५५८२)
छिद्यमानाः शितैः शस्त्रैः क्षत्रधर्मपरायणाः ।
हतास्ते ब्रह्मसदनं गता वीराः सुवर्चसः ॥ ११-२६-१६ (६५५८३)
ये त्वत्र निहता राजन्नन्तरायोधनं प्रति ।
यथाकथञ्चित्पुरुषास्ते गता ह्युत्तरां गतिम् ॥ ११-२६-१७ (६५५८४)
धृतराष्ट्र उवाच। ११-२६-१८क्ष् (५३६९)
केन ज्ञानबलेनैव पुत्र पश्यसि सिद्धवत् ।
तन्मे वद महाबाहो श्रोतव्यं यदि वै मया ॥ ११-२६-१८ (६५५८५)
युधिष्ठिर उवाच। ११-२६-१९क्ष् (५३७०)
निदेशाद्भवतः पूर्वं वने विचरता मया ।
तीर्थयात्राप्रसङ्गेन सम्प्राप्तोऽयमनुग्रहः ॥ ११-२६-१९ (६५५८६)
देवर्षिर्लोमशो दृष्टस्ततः प्राप्तोऽस्म्यनुस्मृतिम् ।
दिव्यं चक्षुरपि प्राप्तं ज्ञानयोगेन वै पुरा ॥ ११-२६-२० (६५५८७)
धृतराष्ट्र उवाच। ११-२६-२१क्ष् (५३७१)
ये त्वनाथा जनास्तात नाथवन्तश्च पाण्डव ।
कच्चित्तेषां शरीराणि धक्ष्यन्ति विधिपूर्वकम् ॥ ११-२६-२१ (६५५८८)
युधिष्ठिर उवाच। ११-२६-२२क्ष् (५३७२)
न येषां शान्तिकर्तारो न च येऽत्राहिताग्नयः ।
वयं च तेषां कुर्यामो बहुत्वात्तात कर्मणाम् ॥ ११-२६-२२ (६५५८९)
यान्सुपर्णाश्च गृध्राश्च विकर्षन्ति ततस्ततः ।
तेषां सङ्कर्षणा लोका भविष्यन्ति न संशयः ॥ ११-२६-२३ (६५५९०)
वैशम्पायन उवाच। ११-२६-२४क्ष् (५३७३)
एवमुक्त्वा महाराज कुन्तीपुत्रो युधिष्ठिरः ।
आदिदेश सुधर्माणं धौम्यं सूतं च सञ्जयम् ॥ ११-२६-२४ (६५५९१)
विदुरं च महाबुद्धिं युयुत्सुं चैव कौरवम् ।
इन्द्रसेनमुखान्भृत्यान्सूतांश्चैव सहस्रशः ॥ ११-२६-२५ (६५५९२)
भवन्तः कारयन्त्वेषां प्रेतकार्याण्यशेषतः ।
यथा नाथवतां किञ्चिच्छरीरं न विनश्यति ॥ ११-२६-२६ (६५५९३)
शासनाद्धर्मराजस्य क्षत्ता सूतश्च सञ्जयः ।
सुधर्मा धौम्यसहित इन्द्रसेनादयस्तथा ॥ ११-२६-२७ (६५५९४)
चन्दनागुरुकाष्ठानि तथा कालीयकान्युत ।
घृतं तैलं च गन्धांश्च क्षौमाणि वसनानि च ॥ ११-२६-२८ (६५५९५)
समाहृत्य महार्हाणि दारुणां चैव सञ्चयान् ।
रथांश्च मृदितास्तत्र नानाप्रहरणानि च ॥ ११-२६-२९ (६५५९६)

चिताः कृत्वा प्रयत्नेन यथामुख्यान्नराधिपान् ।
दाहयामासुरव्याग्राः शास्त्रदृष्टेन कर्मणा ॥ ११-२६-३० (६५५९७)
दुर्योधनं च राजानं भ्रातॄंश्चास्य कर्मणा ॥
शल्यं शलं च राजानं भूरिश्रवसमेव च ॥ ११-२६-३१ (६५५९८)
जयद्रथं च राजानमभिमन्युं च भारत ।
दौःशासनिं लक्ष्मणं च धृष्टकेतुं च पार्थिवम् ॥ ११-२६-३२ (६५५९९)
बृहद्बलं सोमदत्तं सृञ्जयं च महारथम् ।
राजानं क्षेमधन्वानं विराटद्रुपदौ तथा ॥ ११-२६-३३ (६५६००)
शिखण्डिनं च पाञ्चाल्यं धृष्टद्युम्नं च पार्षतम् ।
युधामन्युं च विक्रान्तमुत्तमौजसमेव च ॥ ११-२६-३४ (६५६०१)
कौसल्यं द्रौपदेयांश्च शकुनिं चापि सौबलम् ।
अचलं वृषकं चैव भगदत्ते च पार्थिवम् ॥ ११-२६-३५ (६५६०२)
कर्णं वैकर्तनं चैव सहपुत्रममर्षणम् ।
केकयांश्च महेष्वासांस्त्रिगर्तांश्च महारथान् ॥ ११-२६-३६ (६५६०३)
घटोत्कचं राक्षसेन्द्रं बकभ्रातरमेव च ।
अलम्बुसं राक्षसेन्द्रं जलसन्धं च पार्थिवम् ॥ ११-२६-३७ (६५६०४)
एतांश्चान्यांस्च सुबहून्पार्थिवांश्च सहस्रशः ।
धृतधाराहुतैर्दीप्तैः पावकैः समदाहयन्। ११-२६-३८ (६५६०५)
पितृमेधाश्च केषाञ्चित्प्रावर्तन्त महात्मनाम् ।
सामभिश्चाप्यगायन्त तेऽन्वशासत चापरैः ॥ ११-२६-३९ (६५६०६)
साम्नामृचां च नादेन स्त्रीणां च रुदितस्वनैः ।
कश्मलं सर्वभूतानां निशायां समपद्यत ॥ ११-२६-४० (६५६०७)
हुताश्च तत्प्रदीप्ताश्च दीप्यमानाश्च पावकाः ।
नभसीवान्वदृश्यन्त ग्रहास्तन्वभ्रसंवृताः ॥ ११-२६-४१ (६५६०८)
ये चाप्यनाथास्तत्रासन्नानादेशसमागताः ।
तांश्च सर्वान्समानीय राशीकृत्वा सहस्रशः ॥ ११-२६-४२ (६५६०९)
चित्वा दारुभिरव्यग्रैः प्रभूतैः स्नेहपाचितैः ।
दाहयामास तान्सर्वान्विदुरो राजशासनात् ॥ ११-२६-४३ (६५६१०)
कारयित्वा क्रियास्तेषां कुरुराजो युधिष्ठिरः ।
धृतराष्ट्रं पुरस्कृत्य गङ्गामभिमुखोऽगमत् ॥ ॥ ११-२६-४४ (६५६११)

इति श्रीमन्महाभारते स्त्रीपर्वणि श्राद्धपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥

Mahabharata - Strii Parva - Chapter Footnotes

११-२६-२ दुष्कृतं दुराचरितं स्वकीयम् ॥
११-२६-३ वैरप्रियं पुरुषं xxxx षम् ॥

११-२६४- द्वौ पूर्वापरदुःखद्वयरूपौ ॥
११-२६-५ तपोरूपायार्थाय उत्पन्नं तपोर्थीयम् । त्वद्विधा
वधार्थीयमेव गर्भं धत्ते। अन्या तु जयार्थीयं कीर्त्याद्यर्थीयमपीति
भावः। तपोर्थिनं, वधार्थिनं इति क पाठः ॥
११-२६-१७ ते गतास्तूत्तरान्कुरूनिति छ पाठः । ते गतास्तूत्तमां गतिमिति
ट पाठः। ते गता ह्यधमां गतिमिति क पाठः ॥
११-२६-२४ सुधर्माणं दुर्योधनपुरोहितम् ॥
११-२६-४३ स्नेहपाचितैः स्नेहसंयुक्तैः ॥
११-२६-२६ षड्विंशोऽध्यायः ॥

स्त्रीपर्व - अध्याय ०२७
॥ श्रीः ॥
११.२७. अध्यायः २७

Mahabharata - Strii Parva - Chapter Topics
मृतानामुदकदानाय धृतराष्ट्रयुधिष्ठिरादिभिर्गङ्गातीरगमनम् ॥ १ ॥
उदकदानारम्भे कुन्त्या युधिष्ठिरम्प्रति कर्णस्य
स्वपुत्रत्वकथनपूर्वकं तस्या उदकदानचोदना ॥ २ ॥
धृतराष्ट्रयुधिष्ठिरादिभिर्बन्धुभ्यो जलदानम् ॥ ३ ॥

Mahabharata - Strii Parva - Chapter Text

११-२७-० (६५६१२)
वैशम्पायन उवाच। ११-२७-०क्ष् (५३७४)
ते समासाद्य गङ्गां तु शिवां पुण्यजलान्विताम् ।
ह्लादिनीं च प्रसन्नां च महारूपां महावनाम् ॥ ११-२७-१ (६५६१३)
भूषणान्युत्तरीयाणि वेष्टनान्यवमुच्य च ।
ग्कवचानि विचित्राणि गङ्गामवजगाहिरे'॥ ११-२७-२ (६५६१४)
ततः पितॄणां भ्रातॄणां पौत्राणां स्वजनस्य च ।
पुत्राणामार्यकाणां च पतीनां च कुरुस्त्रियः ॥ ११-२७-३ (६५६१५)
उदकं चक्रिरे सर्वा रुदन्त्यो भृशदुःखिताः ।
सुहृदां चापि धर्मज्ञाः प्रचक्रुः सलिलक्रियाम् ॥ ११-२७-४ (६५६१६)
उदके क्रियमाणे तु वीराणां विरपत्निभिः ।
सूपतीर्थाऽभवद्गङ्गा भूयो विप्रससार च ॥ ११-२७-५ (६५६१७)
तन्महोदधिसङ्काशं निरानन्दमनुत्सवम् ।
वीरपत्नीभिराकीर्णं गङ्गातीरमशोभत ॥ ११-२७-६ (६५६१८)

ततः कुन्ती महाराज रुदन्ती शोककर्शिता ।
व्रीडया मन्दया वाचा पुत्रान्वचनमब्रवीत् ॥ ११-२७-७ (६५६१९)
यः स वीरो महेष्वासो रथयूथपयूथपः ।
अर्जुनेन हतः सङ्ख्ये वीरलक्षणलक्षितः ॥ ११-२७-८ (६५६२०)
यं सूतपुत्रं मन्यध्वं राधेयमिति पाण्डवाः ।
यो व्यराजच्चमूमध्ये दिवाकर इव प्रभुः ॥ ११-२७-९ (६५६२१)
प्रत्ययुध्यत वः सर्वान्पुरा यः सपदानुगान् ।
दुर्योधनबलं सर्वं यः प्रकर्षन्व्यरोचत ॥ ११-२७-१० (६५६२२)
यस्य नास्ति समो वीर्ये पृथिव्यामपि कश्चन ।
यो वृणीत यशः शूरः प्राणैरपि सदा भुवि ॥ ११-२७-११ (६५६२३)
कर्णस्य सत्यसन्धस्य सङ्ग्रामेष्वपलायिनः ।
कुरुध्वमुदकं तस्य भ्रातुरक्लिष्टकर्मणः ॥ ११-२७-१२ (६५६२४)
स हि वः पूर्वजो भ्राता भास्करान्मय्यजायत ।
कुण्डली कवची शूरो दिवाकरसमप्रभः ॥ ११-२७-१३ (६५६२५)
श्रुत्वा तु पाण्डवाः सर्वे मातुर्वचनमप्रियम् ।
कर्णमेवानुशोचन्तो भूयश्चात्यातुरा भवन् ॥ ११-२७-१४ (६५६२६)
ततः स पुरुषव्याघ्रः रुन्तीपुत्रो युधिष्ठिरः ।
उवाच मातरं वीरो निःश्वसन्निव पन्नगः ॥ ११-२७-१५ (६५६२७)
यः शरोर्मिर्ध्वजावर्तो महाभुजमहाग्रहः ।
तलशब्दप्रणुदितो महारथमहाग्रहः ॥ ११-२७-१६ (६५६२८)
यस्येषुपातमासाद्य कोऽन्यस्तिष्ठेद्धनञ्जयात् ।
कथं पुत्रो भवत्याः स देवगर्भः पुराऽभवत् ।
Gकुण्डली कवची शूरो दिवाकरसमप्रभः ॥ ११-२७-१७ (६५६२९)
यस्य बाहुप्रतापेन तापिताः सर्वतो वयम् ।
तमग्निमिव वस्त्रेण कथं छादितवत्यसि ॥ ११-२७-१८ (६५६३०)
यस्य बाहुप्रभावेन वैरमस्मास्वरोचयत् ।
सुयोधनस्तु तं ज्येष्ठं कथं नोदितवत्यसि ॥ ११-२७-१९ (६५६३१)
तथा कर्णं महेष्वासं धार्तराष्ट्रैरुपासितम् ।
उपासितं यथाऽस्माभिर्बलं गाण्डीवधन्वनः ॥ ११-२७-२० (६५६३२)
भूमिपानां च सर्वेषां बलं बलवतां वरः ।
नान्यः कुन्तीसुतात्कर्णादगृह्णाद्रथिनो रथी ॥ ११-२७-२१ (६५६३३)
स नः प्रथमजो भ्राता सर्वशस्त्रभृतां वरः ।
असूत तं भवत्यग्रे कथमद्भुतविक्रमम् ॥ ११-२७-२२ (६५६३४)
अहो भवत्या मन्त्रस्य गूहनेन वयं हताः ।
निधनेन हि कर्णस्य पीडितास्तु सबान्धवाः ॥ ११-२७-२३ (६५६३५)
अभिमन्योर्विनाशेन द्रौपदेयवधेन च ।

पाञ्चालानां विनाशेन, कुरूणां घातनादपि ॥ ११-२७-२४ (६५६३६)
ततः शतगुणं दुःखमिदमापतितं महत् ।
कर्णमेवानुशोचापि दह्याम्यग्नाविवाहितः ॥ ११-२७-२५ (६५६३७)
नेह स्म किञ्चिदप्राप्य भवेदपि दिवि स्थितम् ।
न चेदं वैशसं घोरकं कौरवान्तकरं भवेत् ॥ ११-२७-२६ (६५६३८)
एवं विलप्य बहुलं धर्मराजो युधिष्ठिरः ।
व्यरुदच्छनकैः राजंश्चकारास्योदकं प्रभुः ॥ ११-२७-२७ (६५६३९)
ततो विनेदुः सहसा स्त्रियस्ताः खलु सर्वशः ।
अभितो याः स्थितास्तत्र तस्मिन्नुदककर्मणि ॥ ११-२७-२८ (६५६४०)
तत आनाययामास कर्णस्य सपरिच्छदाः ।
स्त्रियः कुरुपतिर्धीमान्भ्रातुः प्रेम्णा युधिष्ठिरः ॥ ११-२७-२९ (६५६४१)
स ताभिः सह धर्मात्मा प्रेतकृत्यमनन्तरम् ।
ग्सर्वं चकार कर्णस्य विधिवद्भूरिदक्षिणम् ॥ ११-२७-३० (६५६४२)
स राजा धृतराष्ट्रश्च कृत्वा जलमतन्द्रितः ।
समुत्ततार गङ्गाया भार्यया सह भारत ॥' ११-२७-३१ (६५६४३)
श्पापेनासौ मया श्रेष्ठो भ्राता ज्ञातिर्निपातितः ।
अतो मनसि यद्गुह्यं स्त्रीणां तन्न भविष्यति ॥ ११-२७-३२ (६५६४४)
इत्युक्त्वा स तु गङ्गाया उत्तताराकुलेन्द्रियः ।
भ्रातृभिः सहितः सर्वैर्गङ्गातीरमुपेयिवान् ॥ऽ ॥ ११-२७-३३ (६५६४५)

इति श्रीमन्महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां
स्त्रीपर्वणि श्राद्धपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥
अतः परंशान्तिपर्व भविष्यति तस्यायमाद्यः श्लोकः। ११-२७-१ (६५६४६)
११-२७-१क्ष् (५३७५)
वैशम्पायन उवाच ।
कृत्वोदकं ते सुहृदां सर्वेषां पाण्डुनन्दनाः ।
विदुरे धृतराष्ट्रश्च सर्वाश्च भरतस्त्रियः ॥
Mahabharata - Strii Parva - Chapter Footnotes

११-२७-२ वेष्टनानि उष्णीषकटिबन्धनादीनि ॥
११-२७-५ जलावतरणमार्गा ॥
११-२७-१४ भवन् अभवन् । अडभाव आर्षः ॥
११-२७-२५ दग्धामग्नाविवाहुतिमिति क पाठः ॥
११-२७-२६ कर्णे भ्रातृत्वेन ज्ञाते सति तदनुसारिणामस्माकमपि
दुर्लभं नाभविष्यन्नपि कौरवाणां क्षयोऽभविष्यदित्यर्थः । न
च मे किञ्चिदप्राप्यमिति क पाठः ॥

११-२७-२७ सप्तविंशोऽध्यायः ॥

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org